चिन्तामणि

42
3(d)

यदेष इति भावस्त्वारूः। न चेतिमिकृत इति शेषः इष्टसाधनताज्ञानमिति। पक्षतावच्छेदकचैत्यचंदनत्वादिप्रकारेणेष्टसाधनतारूपज्ञानमित्यर्थः अनु
भावकंकृतिसाध्यतानुभावकं। अपेक्षतनपानप्रवृत्तौ व्यभिचारस्तत्रेपि शेषाद् दूषणांतरमाह। वस्तुत इति। वस्तुगत्येत्यर्थः तत्र विषयभक्षणादौ तदनुभवसंभवा
दिति संजातबाधदशायामपि कृतिसाध्यतानुभवसंभवादित्यर्थः अननुभवस्य हेतुत्वे व्यभिचारमप्याह। लिंगाभावादिति अप्रइति प्रसंगादिति कृतिसाध्ये गुरुत
रभारोत्तोलनादौ प्रवृत्तिप्रसंगादित्यर्थः भेदाग्रहवादिन इति स्वकृतिसाध्यताभेदाग्रहवादिन इत्यर्थः अन्यथाख्यातेरनंगीकारादिति भावः। तदनुभवाभावा
दिति तथा च स्वकृतिसाध्यताज्ञानसामान्यमेव प्रवृत्तिहेतुर्न तु तदनुभवमात्रमिति तत्र स्वकृतिसाध्यतास्मरणात प्रवृत्त्यापत्तिर्दुर्वारेति भावः। यद्यपि संज्ञानतवा
ध्यस्य स्वकृतिसाध्यतास्मरणात्कथं प्रवृत्त्यापादनं भाविद्यौवराज्ये प्रवृत्त्यतिप्रसंगवारणाय इदानींतनस्वकृतिसाध्यताज्ञानस्यैव प्रवर्त्तकत्वेन तदभा
वात् इदानीं प्रतभावेन तेकृ प्रागननुभूतत्वेन स्मरणायोगात्। न चेतन्मते। अतीतात्वाद्यगोचरज्ञानस्य विषयनिष्ठवर्त्तमानत्वविषयत्वनियमादनुभवागोचर
स्यापीदानींतनस्य कृतौ स्मृतौ भानमिति वाच्यम् प्रमुष्टतत्ताकज्ञानेष्वविशेष्यनिष्ठवर्त्तमानताभानस्यैव तैः स्वीकारात् इदानींतनकृतेः पूर्वमननुभूतत्वे
न पूर्वाननुभूतकृतत्वेव इदानींतनभानाभ्युपगमे अन्यथाख्यात्यापत्तेश्च किंच इदानींतनकृत्यनुत्पादेन इदानींतनकृतिसाध्यत्वस्य तत्र बाधात्तत्ताहशकृ
तिसाध्यतास्मरणाभ्युपगमे अन्यथाख्यात्यापत्तिस्तथापि स्वकृतिसाध्यतास्मरणादेव बाधस्य न ध्यानप्रवृत्त्यनुरोधात्तत्र चिकीर्षायामपि न भोजनादौ कृत
श्चित्प्रतिबंधात्प्रवृत्तिस्तत्र इदानींतनकृतेरसत्त्वात् तत्र साध्यताज्ञानाभावाच्चिकीर्षासंभवात्कृतानुपस्थितेरिदानींत्वांशसंसर्गाग्रहसहकृतस्वकृति
साध्यताज्ञानमेव तन्मते प्रवर्त्तकं तथा च प्रकृतेपि ज्ञानमात्रस्यैव स्वोत्पत्तिक्षणावच्छिन्नविषयत्वनियमेन स्मृतितउपस्थितस्य इदानींत्वस्य कृतावसंसर्गा

42
3(d)

718

चि॰टी॰ ग्रहात्सामान्यतः स्वकृतिसाध्यताविशिष्टस्मरणाच्च प्रवृत्त्यापत्तिरित्यभिप्रायः। वस्तुतस्तु इष्टसाधनताविज्ञानस्याहेतुत्वे संजातबाधतादशायामपिश्र
द्धाभासलिंगाभासादिदानींतनस्वकृतिसाध्यताभ्रमाच्चैत्यवंदनादौ प्रवृत्त्यापत्तिः वस्त्वंतरविषयकतादृशकृत्यंतरमादायानुमानारोपसंभवात्तान
वतन्मतेनादृशकृतिसाध्यताविशिष्टज्ञानमेव प्रवर्त्तकमिति नभ्रमात्मकवृत्तिरिति वाच्यं तथासति निगडनिश्चलदेहस्य कृत्यसाध्यगुरुतरभारोत्तोलनादौ प्र
वृत्त्यनुपपत्तेः अन्यथाख्यात्यनभ्युपगमेन विशिष्टज्ञानाभावात् किंच इदानींपदेन स्वत्वकालस्यैव प्रवर्त्तकज्ञाने निवेशादसंजातबाधकाले कृते हृदये न
तत्कालवर्त्तमानस्वकृतिसाध्यताप्रमापि संजातबाधतादशायां लिंगांतरादीनां संभवतीत्येवं रूपेणोद्दृष्टव्यं स्वविशेषणेति। स्वप्रवर्त्तमानपुरुषः तस्यपदि
शेषणे तन्निष्ठो यो धर्मस्तद्वत्ताज्ञानजन्यमित्यर्थः पुरुषविशेषणपुरुषवृत्तिधर्मः ततस्तदनंतरं कार्य्यताज्ञाने कार्य्यतानुमाने स्वविशेषणवत्ताप्रति
संधानजन्यमिति शेषः। अनुमानप्रकारमेव आह ये वाध्याः। नन्वकाम्यसाधनताज्ञानात्पाकपाकादौ कार्य्यताज्ञानं कथं कामनावत्ताज्ञानजन्यकाम्यसाध
नतावत्ताज्ञानेनैव तज्जननादिति वाच्यं तद्वत्ताज्ञानं हि पक्षे तत्संबंधज्ञानं भवति च काम्यसाधनताज्ञानमपि कामनायाः स्वविषयसाधनतात्मकसं
बंधज्ञानं वस्तुतस्तु तद्वत्ताज्ञानं तत्संबंधज्ञानं तन्नज्ञानमेव चानन्तुपश्लोप्यन्तर्भूतः तथा च काम्यसाधनताज्ञानमपि कामनायाः तत्संबंधस्य च ज्ञानं
भवत्येव कामनायाविषयतात्मकतत्संबंधस्य च विषयीकरणादिति भावः एवं सति यथा नातिप्रसंगस्तदनुपदमेव विवेचयिष्यामः। काले तितन्न
तत्कर्मविहितकाल इत्यर्थः पौर्णमाद्यादीत्यादिना द्विजातित्वादिपरिग्रहः स्वविशेषणं प्रवर्त्तमानपुरुषनिष्ठधर्मः। तत्तत्कालस्यापिजीवित्वसंबंधेन पुरुष राम॰
निष्ठत्वादिति भावः। तथा चेति। तेन चेत्यर्थः अन्वयमाश्वास्यकार्यताज्ञानं इत्यनेन रुक्तसंध्यायामिति इदं च साध्यस्य कृतिविशेषणं नतु पक्षविशेषण

नतुपत्तविशेषणांशप्रयोजनाभावात्प्रवर्त्तकत्वानाश्रमेष्वसंध्यासमपदतिऐतत्संध्यासमपदमित्यर्थः॥ शौचादीत्यादिना द्विजातित्वपरिग्रहः तेनश
द्रादीनव्यभिचारः योयत्तत्संध्याकालीनशौचादिमान्द्विजातिः सततत्कालीनकृतिसाध्यसंध्यावंदनकर्तृतिसामान्यतो व्याप्तिरितिभावः नचाकृतकृति
साध्यत्वंकृतिफलीपहितत्वमेव साध्यघटकं स्वरूपयोग्यत्वरूपत्वे हेतुविशेषणावैयर्थ्यापत्तेस्तथा चकृतसाध्यत्वराजभपादिरूपवलवदनिष्टसा
धनत्वज्ञानादिनाश्रालस्यादिनावाश्रकृतसंध्यावंदनके द्विजातौ व्यभिचार इति वाच्यं तद्धूव्यत्वेनापिहेतोर्विशेषणीयत्वात्॥ नचकृतसंध्यावंदनस्या
पितत्र प्रवृत्तिः स्यादिति वाच्यं स्वविषयसिद्ध्याचिकीर्षाविरहेणतत्राप्रवृत्तेरितियद्यप्येततेत्तानेनप्रवर्त्तकंकृतौ मंदंशाप्रकारकत्वात्तथापि सं
ध्यावंदनइदानीमत्कृतिसाध्यंमत्प्रवृत्तिप्रतिबंधकदुरत्वत्वेसति इदानीं शौचादिमतो ममेदानींकृतिसाध्यत्वेनवेद्बोधितत्वादित्यनुमाने
ग्रंथतात्पर्यं॥ अत्रमीमांसककृयत्यसंमतिमाहत्वत्तंमिति सचकार्यविशेषइतिसचकार्यनिष्ठो विशेषः तदानींतनस्वकृतिसाध्यत्वरूपइत्य
र्थः पुरुषविशेषणावगतइतिपुरुषविशेषणस्वविशेषणवत्तज्ञानवत्तावगतइत्यर्थः पुरुषविशेषावगतइतिपाठे पिविशिष्यतेनेनेति विशेषो विशे
षणं॥ कामनादिनालिंगेनावगतइत्यर्थः॥ प्रवृत्तिहेतुः प्रवृत्तिप्रयोजकः॥ एवंचउक्तातिप्रसंगमुद्धरतिसजातवाधस्येतिभ्रमदशापामिवेतिचलवदनिष्टा
ननुवंधित्वेइष्टसाधनत्वभ्रमदशायामित्यर्थः॥ इष्टसाधनताज्ञानमितिवलवदनिष्टाननुबंधित्वेइष्टसाधनताज्ञानमित्यर्थः॥ यद्यपिविषमक्षणे वलवद
निष्टाननुवंधित्वज्ञानाभावेपितज्जन्यसुखेच्छासत्वादिष्टसाधनत्वरूपस्वविशेषणावत्ताप्रतिसंधानजन्यंकार्यताज्ञानसंभवत्येवतथापिस्वविशेषणा
वत्ताप्रतिसंधानेवलवदनिष्टाननुवंधित्वविषयकत्वमपिविशेषणादेयमित्यभिप्रायः इष्टसाधनताज्ञानाभावादितितदानींतनेच्छाविषयसाधनता

वि॰टी॰ तानाभावादित्यर्थः नतथावोधः नतज्जन्योवोधः । नचैवमतीतपौवादिलिंगाभासजन्यकार्य्यताज्ञानादपिप्रवृत्त्यापत्तिरितिवाच्यंतदानीतनत्वेना
पिस्वविशेषणविशेषणात्नचैवंकालभेदेनपुरुषभेदेनचकार्य्यकारणभावभेदादनंतकार्य्यकारणभावप्रसंगइतिवाच्यंनैयायिकानामपिप्र
वृत्तिविषयविशेष्यकतदानीतनस्वेष्टविषयतदानीतनस्वकृतिसाध्यत्वादिज्ञानस्यहेतुत्वेनकालभेदेनपुरुषभेदेनविषयभेदेनचकार्य्यकारणभावा
नंत्यस्याविशिष्टत्वात्अतएवस्वसमाराक्षणेनित्यकाम्यभेदेनकार्य्यकारणभावभेदेपितत्प्रवृत्तिरितिमतंनचस्वप्रवृत्तिधर्मप्रतिसंधानजन्यकार्य्य
ताज्ञानमात्रस्यप्रवृत्तिहेतुत्वेइष्टसाधनत्वाद्यज्ञानेपिइदंस्वेच्छाधीनेदानीतनमत्कृतिसाध्यंस्वेच्छाधीनेदानीतनमत्कृतिव्यतिरेकप्रयुक्तव्यतिरे
कप्रतियोगित्वात्जन्यत्वेसतितादृशाकृत्यघटितसामग्र्यजन्यत्वादित्यादिनाकार्य्यताज्ञानात्प्रवृत्त्यापत्तिःतस्यापिमद्दिष्टाकृतितादृशकृतिसामग्र्य
जन्यत्वादिरूपस्वप्रवृत्तिधर्मप्रतिसंधानजन्यत्वादितिवाच्यंस्वविशेषणपदेनविशिष्यतदानीतनशुचित्वजीवित्वादिमत्त्वरूपस्वप्रवृत्तिधर्मस्यविवक्षि
तत्वात्फलेच्छाविरहदशायांमयिपदाकदाचिदिष्टविषयसाधनत्वरूपलिंगाभासजन्यतदानीतनस्वकृतिसाध्यताज्ञानात्प्रवृत्तिवारणायतदा
नीतनेतिशुचित्वादिविशेषणंनचैवंकालभेदेनपुरुषभेदेनचकार्य्यकारणभावभेदेनानंतकार्य्यकारणभावप्रसंगइतिवाच्यं।त्वन्मतेपिप्रवृत्तिवि
षयविशेष्यकतदानीतनस्वेष्टविषयसाधनत्वतदानीतनस्वप्रवृत्तिसाध्यत्वादिज्ञानस्यचिकीर्षायांप्रवृत्तौचहेतुतयाकालभेदेनपुरुषभेदेनचका
र्य्यकारणभावानंत्यस्याविशिष्टत्वात्।एतेनस्वविशेषणपदस्यानातिरिक्तरूपेणतत्तद्विशेषणपरत्वेपिइष्टसाधनत्वाज्ञानेशौचादिमत्वप्रतिसंधा राम॰
नजन्यकार्यताज्ञानात्कार्येप्रवृत्त्यापत्तेःएवंएतादिविशेषणानामननुगमेनपरस्परव्यभिचारश्चेत्यपिपरास्तम्।कालभेदेनविषयभेदेनचकार्यका
भे

रणाभावभेदात्काम्यतादृशापांतदानींतेनस्वेष्टाविषयसाधनत्ववलवदनिष्टाननुबंधित्वज्ञानजन्यकार्यताज्ञानस्यहेतुत्वात्नित्यतादृशायांचतदा
नींतन्नशौचादिमत्वप्रतिसंधानजन्यकार्यताज्ञानस्यहेतुत्वात्प्रवृत्तिमात्रेचकार्यताज्ञानस्यसामान्यहेतुःनित्यकाम्यभेदेनकार्यकारणभावभेदेपिपद्यानदोष
सपोक्तंप्राक्नित्यपदंचतदानींतत्स्वरूपेणानित्यत्वेनज्ञायमानपरंतेननित्यस्यकाम्यत्वभ्रमेनित्यानित्यत्वज्ञानेवानशौचादिलिंगककार्यताज्ञानमात्रात्प्र
वृत्तिःकाम्यत्वंचतदानींतत्स्वरूपेणानित्यत्वेनाज्ञायमानत्वंतेनकाम्यस्यनित्यत्वभ्रमेपिशौचादिमत्ताज्ञानजन्यकार्यताज्ञानादेवप्रवृत्तिःनित्यत्वंचयत्सत्वायज
न्यकीभूताभावप्रतियोगित्वंसर्वंचतज्जन्यत्वंतद्विशिष्टत्वमेववैशिष्ट्यंचैककालावच्छेदेनैकात्मवृत्तित्वंजन्यत्वप्रवेशेगौरवात्बालकस्यस्तनपानेप्रवृ
त्तौस्वकृतिसाध्यतास्मरणस्यैवतेरपिहेतुत्वेनवक्ष्यमाणतयाव्यभिचाराच्चनचजन्मत्वपदेनप्रतियोगित्वेविवक्षितेतथाचतत्रतत्स्मरणमपिजन्मांतरीयत
यातादृशकार्यतानुभवद्वाराव्यभिचारइतितत्रयोज्यत्वंभवत्येवेतिवाच्यंतथासतिसंजातबाधस्यापिजन्मांतरानुभूतकार्यतास्मरणाद्विषभक्षणेप्रवृत्त्याप
त्तेःतृप्तस्यापिकालांतरानुभूतकृतिसाध्यतास्मरणाद्भोजनादौप्रवृत्त्यापत्तेश्चेष्टसाधनताज्ञानविशिष्टकार्यताज्ञानंचतत्रास्त्येवबालकस्यस्तनपानेसु
खविशेषकारणतास्मरणात्तत्रसुखविशेषेतदानीमिच्छाविषयसाधनताज्ञानस्यापितदानींसत्वेनस्मरणस्यापितद्विशिष्टत्वात्अतएवेष्टसाधनता
दिज्ञानसत्वेलिंगांतरात्कार्यताज्ञानेपिप्रवृत्तिर्नानुपपन्नानवालिंगसंशयस्यानुमितिहेतुत्वेपिइष्टसाधनतासंदेहात्प्रवृत्तिरनुपपन्नानचैवंफलका
मनाविशिष्टकार्यताज्ञानमेवकाम्यतादृशापांप्रवर्तकमस्तुइतिवाच्यंकामनापासत्वात्द्विषयसाधनत्वाज्ञानेपिप्रवृत्त्यापत्तेःकेचित्तुतादृशोभयवि
शेषणाधीनकार्यताज्ञानानामेकशक्तिमत्वेनप्रवृत्तिसामान्येहेतुत्वमतःप्रातिस्विकरूपेणतत्तद्विशेषणापरत्वेपिनपरस्परंव्यभिचारइत्याहुः

तदसत्। तथापि भोजनादौ काम्यतादशायां श्येनादिलिङ्गककार्यताज्ञानमात्रात्प्रवृत्तिवारणाय कालभेदेन विशेषसामग्र्याः आवश्यकत्वेन यासामान्यकार्यका
रणभावाभ्युपगमस्य सर्वापाससमात्रत्वात्। अन्ये तु फलार्थिचिकीर्षाप्रवृत्तौ प्रतिफलसाधनताज्ञानविशिष्टकृतिसाध्यताज्ञानं हेतुः। फलं स्वर्गादि। तदर्थित्वं तदुद्दे
श्यकत्वं न चैवं स्वर्गादावनिष्ठाविरहेपि स्वर्गादिसाधनताज्ञानविशिष्टकृतिसाध्यताज्ञानाच्चिकीर्षादिप्रसङ्ग इति वाच्यं स्वर्गार्थीच्छाप्रति स्वर्गादीच्छायाः अपि प्रयोजकहे
तुत्वात् श्येनादिमत्ताप्रतिसंधानविशिष्टकृतिसाध्यताज्ञानं च नित्यस्थालीपचिकीर्षाप्रवृत्तिं प्रति हेतुः। नित्यस्थालीपत्वं च चिकीर्षाविषयतावच्छेदकावच्छिन्नवि
शेष्यकनित्यत्वज्ञानविशिष्टत्वं वैशिष्ट्यं च स्वरूपसाधारणं व्यवहितोत्तरत्वेनावच्छेदनैकात्म्यप्रवृत्तित्वं न चैवं काम्यतादशायां श्येनादिमत्ताप्रतिसंधानवि
शिष्टकार्यताज्ञानान्नित्यस्थालीपचिकीर्षापत्तिरिति वाच्यं। नित्यस्थालीपचिकीर्षादिकं प्रति समानविशेष्यकनित्यत्वज्ञानस्यापि हेतुत्वादित्याहुः। तत्
दप्यसत्। प्राचीननैयायिकानां गुरूणां च श्येनादौ तत्कालीनत्वतत्पुरुषीयत्वविशेषणस्यावश्यकत्वात्कालभेदेन पुरुषभेदेन च कार्यकारणभावभेदस्या
वश्यकत्वात्तत एवातिप्रसङ्गासंभवेन नित्यस्थालीपत्वस्य कार्यतावच्छेदककोटिप्रवेशे गौरवात्। नित्यत्वज्ञानस्य प्रयोजकहेतुत्वे गौरवाच्च न चेष्टसाधनताज्ञानवि
शिष्टकार्यताज्ञाने कार्यताविशिष्टेष्टसाधनताज्ञाने वा हेतुरित्यत्र विनिगमनाविरहादिष्टसाधनताज्ञानस्यापि हेतुत्वं दुर्वारमिति वाच्यं इष्टसाधनताज्ञान
नाशेपि चिकीर्षासत्त्वे प्रवृत्त्यनुभवेन व्यभिचारात्तेन च चिकीर्षैव तत्स्थापारः। चिकीर्षामत्यपि विनिगमनाविरहेणोभयोर्हेतुत्वादिति वाच्यं इच्छायाः समान
प्रकारकज्ञानजन्यत्वनियमेन कृतिसाध्यताज्ञानस्य हेतुतायाः आवश्यकत्वात्तत्र विनिगमनाविरहानवकाशात् न च तथापि इष्टसाधनताज्ञानविशिष्टत्वकृतिसा राम॰
ध्यताविषयकत्वज्ञानत्वानां विशेष्यविशेषणभावे विनिगमनाविरहो दुर्वार इति वाच्यम्। इष्टसाधनताज्ञानविशिष्टत्वकृतिसाध्यताविषयकत्वज्ञानत्वावि

कारणत्वानामेकत्रद्वयमिति न्यायेनास्य प्रवृत्त्यवच्छेदकत्वाभ्युपगमात्तादृशविनिगमनाविरहानवकाशात् इष्टसाधनताज्ञानं चउ
पस्थितप्रवृत्तिविषयाऽगृहीतासंसर्गकेष्टसाधनताद्विज्ञानं वा ध्येयं न तु प्रवृत्तिविषयविशेष्यकं तथा सति भ्रमस्य विशिष्टज्ञानत्वानभ्युपगमेन
इष्टसाधनतादिभ्रमाद्धेत्त्ववेदनादौ कदाचित्प्रवृत्तिर्न स्यात् । एवं कार्यताज्ञानमपि उपस्थितप्रवृत्तिविषयाऽगृहीतासंसर्गककार्यताज्ञानं बोध्य
म् । न तु प्रवृत्तिविषयविशेष्यं तथा सति कृत्यसाध्ये गुरुतरभारोत्तोलनादौ प्रवृत्त्युपपत्तेः । अन्यथाख्यात्यनभ्युपगमे न तत्र विशिष्टज्ञा
नासम्भवात् न चैवमसंसर्गाग्रहप्रवेशे गौरवमिति वाच्यं तावताऽन्यथाख्यातिसिद्धावपि इष्टसाधनताज्ञानस्य प्रवृत्तिहेतुत्वासिद्धेरित्यास्तां वि
स्तरः । महार्णवकारोपमतमाह । अन्ये त्विति जीवित्वप्रतिसंधानेति जीवित्वादिप्रतिसंधानेनेत्यर्थः । आदिना शारीरित्वात्मकत्वानवत्त्वादिपरि
ग्रहः । स्वमे जीविमात्रसाध्यत्वं तदीयकर्मत्वसिद्धिसंभवति स्वस्मिन्निदानीं कृतिसाध्यैतत्कर्मजन्यधर्मकजीवित्वादित्यादिना रूपेणेति भावः । इती
तिनित्यत्वेन तापमानेनेतादृशाश्रमे जीवित्वप्रतिसंधानजन्यकृतिसाध्यज्ञानमादायप्रवृत्त्युत्पत्तिप्रसंगवारणायेति शेषः । जीवनव्यतिरिक्तत्वमि
तिस्वविशेषणवत्ताप्रतिसंधानजन्येत्यत्र विशेषणपदं जीवनरूपविशेषणपरमित्यर्थः । स्वेच्छाधीनेति । स्वविशेषणपदस्य जीवित्वरूपविशेष
णपरत्वेपि इष्टसाधनत्वादिभ्रमेणान्तरलिंगककार्यताज्ञानदशायां तत्रा प्रवृत्त्युपपादनाय स्वेच्छाधीनत्वस्यावश्यं निवेशनीयत्वादिति भावः । प्रव
र्तकमिति प्रवृत्तिमात्रकारणमित्यर्थः । नित्य इति निष्फलत्वानभ्युपगमात् । अपूर्वस्य स्वतः पुरुषार्थत्वाभावादिति भावः । विषभक्षणाव्याहृ
तमिति विषभक्षणादिव्याहृतमित्यर्थः । आदिना चैत्यवंदनादिपरिग्रहः । इष्टसाधनत्वमेवेति वक्ष्यमाणनिष्फलानुवेधित्वे सतीष्टसाधनत्वमित्य

चि॰टी॰

र्थः विशेषणमस्तु विशेष्यकार्यकारणभावे विशेषणमस्तु तथा चेष्प्रवृत्तिविषयविशेष्यकत्वनिष्ठानुबंधितेष्टसाधनत्वविषयककृतिसाध्यता
प्रकारिताशालिज्ञानत्वेनअन्यथाख्यातेरनंगीकारे च उपस्थितप्रवृत्तिविषयागृहीता संसर्गकतादृशज्ञानत्वेन कार्यत्वस्य लेप्रवृत्तिहेतुत्वमितिभावः इदमुप
लक्षणं नित्यस्य जे विशेषे च दृष्टसत्वे विषयता पाकृतिसाध्यताज्ञाने विशेषणमस्त्वितरपि वेध्येस्व विशेषणावत्ताज्ञानजन्यत्वापेक्षयेति इष्टसाधनताज्ञानविशिष्ट
त्वापेक्षयेत्यर्थः। एककालावच्छेदेनैकात्मवृत्तित्वरूपवैशिष्ट्यस्य उभयत्र प्रवृत्तिविषयविशेष्यकत्वावच्छिन्नत्वस्य उभयत्र ज्ञानज्ञानत्वयोस्त्व प्रवेशात् उभयत्र प्र
वृत्तिविषयविशेष्यकत्वस्य प्रवृत्तिविषयागृहीता संसर्गकत्वस्य वा प्रवेशाच्च तस्य गुरुत्वात् न चेष्टसाधनताविषयकत्वकृतिसाध्यताविषयकत्वज्ञानत्वानां मिथो
विशेषणविशेष्यभावे विनिगमकाभावात्तत्वापि वहुतरकार्यकारणभावकल्पनागौरवमिति वाच्यं। एकत्रकृप्तमितिन्यायेनेष्टसाधनताविषयकत्वकृतिसाध्यतावि
षयकत्वज्ञानत्वाधिकरणत्वानां परस्परासंसृष्टानामेव व्यासज्यवृत्त्यवच्छेदकत्वाभ्युपगमात्। अन्यथा तत्रापीष्टसाधनताज्ञानविशिष्टत्वकृतिसाध्यताविषय
कत्वज्ञानत्वानां विशेषणविशेष्यभावे विनिगमकाभावेन गुरुतरानंतकार्यकारणभावबाहुल्यस्य दुर्वारत्वात्। न चैवमपि इष्टसाधनतादिज्ञानसत्वेन द्विष
ककार्यताज्ञानानंतरं प्रवृत्तिर्न स्यादिति वाच्यं लाघवादेकरूपेण कारणत्वकल्पनेन तत्तदुत्तरं समूहालंबनज्ञानकल्पनात् न च तथापि निश्चिताव्यभिचारकं
रूपं परित्यज्य संदिग्धव्यभिचारकेन कारणत्वकल्पनमयुक्तमिति वाच्यं निश्चिताव्यभिचारकलघुरूपसत्व एव तथात्वादिति भावः उपायविषयेति सुख
दुःखाभावेतरविषयेत्यर्थः इष्टसाधनताज्ञानसाध्येति इष्टसाधनताज्ञानत्वावच्छिन्नकारणताप्रतियोगिककार्यताश्रय इत्यर्थः उपायेच्छात्वादितिसु
खत्वदुःखाभावत्वाद्यप्रकारकेच्छात्वादित्यर्थः पक्षहेत्वोर्जन्यत्वे विशेषणादेयं तेनेश्वरेच्छायां नाशतो वाधव्यभिचारौ दृष्टीच्छावदिति दृष्टिभेदवत्तिनी रम०

व्याप्तवदित्यर्थः। इदमुपलक्षणं कृतिसाध्यत्वाप्रकारकपाकादीच्छायामपि दृष्टान्तो बोध्यः। अयं च प्रसाध्यांशको दृष्टान्तः। परेषां कृतिसाध्यत्वाप्रकारकोपायो देश्यके
च्छानभ्युपगमे न दृष्टिर्भवतु पाकोऽभवत्वित्यादीच्छायास्तन्मते सिद्धेः। इष्टसाध्यं सुखं भवत्विति नीयरांशानुभूते दृष्टसाध्यत्वज्ञाने नैव हेतुत्वान्न लिप्सा साधनताज्ञा
नस्येति ध्येयं। शंकते भोगचिकीर्षायामिति सुखदुःखाभावचिकीर्षायामित्यर्थः। तदभावात् इष्टसाधनताविषयककृतिसाध्यताज्ञानस्य हेतुत्वाभावात् तत्र प्रयोजक
मिति उपायचिकीर्षायामपि न विपक्षतया कारणतावच्छेदकमित्यर्थः। तथापीति भागचिकीर्षाकारणीभूतकार्यताज्ञाने इति शेषः। तत्राप्युपायचिकीर्षायाम
पीति यावत्। तस्य च विशेषणज्ञानं जन्यत्वस्याप्रयोजकत्वात् कारणतावच्छेदकत्वाभावप्रसंगात् शंकते कृतीति चिकीर्षात्वेन कृतिहेतुचिकीर्षायामित्यर्थः। तत्र स्ववि
शेषणाधीजन्यत्वं। तथाचिकीर्षात्वेन कृतिहेतुः तेन भोगचिकीर्षायाः फलेच्छात्वेन कृतिहेतुत्वस्यापि नातिप्रसंगः। तुल्यमिति प्रमायामपि उपायचिकीर्षायामिष्टसाध
नत्वमप्रयोजकमित्यर्थः। सामान्ये गौरवं न दोषायेत्याशयेन समाधत्ते नैवमिति साध्यत्वसाधनत्वयोरिति कृतिसाध्यत्वकालान्तरभाविनोरिष्टसाधनत्वयोरित्यत्र कालां
तरभावित्वस्य ध्वंसाधिकरणक्षणाभावित्वं विरोधेनेति एकावच्छेदेनैकत्र वर्तमानत्वेनेत्यर्थः। एकत्र एकस्मिन् धर्मिणि पाकादौ ज्ञानप्रसक्तत्वादिति एकदा विरुद्धत्वेन प
कत्र ज्ञातुं एकेन निश्चयेन विषयीकर्तुमशक्यत्वादित्यर्थः। विरोधमुपपादयति असिद्धस्येति आद्यक्षणविशिष्टस्योत्पत्तिकालीनस्य हि पाकादेरित्यर्थः। साध्यत्वं कृति
साध्यत्वं कृतिसाध्यत्वस्य तदधीनसमसम्बन्धवत्त्वरूपत्वादिति भावः। सिद्धतादशायामिति आद्यक्षणेऽपि आद्यक्षणोत्तरतादशायामित्यर्थः। आद्यक्षणसंबन्धस्यैवो
त्पत्तिरूपस्य कारणाधीनत्वादिति भावः। सिद्धतादशायां च साधनत्वमिति अनाद्यक्षणवृत्तितादशायामेव च कालान्तरभाविष्टादिसाधनत्वमित्यर्थः। असिद्धाव
स्यातः इति आद्यक्षणावस्थापि नो योगादेरित्यर्थः। कार्यात् उत्पत्तेः कालान्तरभाविकार्यस्वर्गाद्यनुत्पत्तेः यद्यपि उत्पत्तिकालीनात् कार्यान्तरभाविकार्यानुत्पादे पि

चि॰टी॰ कारणतावच्छेदकधर्मवत्त्वरूपं कारणत्वं मा घटतां तथोत्पत्तावितिकथंविरोधः। तथापि स्वरूपयोग्यमिदं न फलं जनयिष्यतीति ज्ञानेन महत्तमनुत्पादात् फलोपधाना
त्मकदृष्टसाधनत्वस्यैव संशयस्य धारणेऽज्ञाने हेतुर्वाच्यः नादृशश्च कालांतरभाव्योऽदनादिसाधनत्वयोगाद्वा बाधवृत्तेन संभवति तस्य कालांतर एव फलोपधायक
त्वादिति भावः। केचित्तु गुरुर्न्नयेफलसमयवर्त्तिन एव कारणतं पाकलसमयवर्त्तित्वस्यापि कारणताघटकत्वाद्बाधवृत्तेनात्र संभवदित्यभिप्रायः। इत्थं च सा
धनत्वयोर्विरोधेनेत्यत्र साधनत्वपदं सामान्यत ओदनादिसाधनत्वपरमेव। ननु कालांतरभावित्वेनौदनादिकं विशेषणीयं। असिद्धावस्थातः कार्यानुत्पत्तेरित्य
स्योत्पत्तिकाले कार्यसहवर्त्तित्वघटितस्य कारणत्वस्याभावादित्यर्थ इत्याहुः। विरोधं व्युत्पाद्यैकनिश्चयविषयत्वासंभवं व्युत्पादयति। तथा चेति। असिद्धत्वसिद्धि
त्वज्ञाने इति। असिद्धसिद्धत्वोभयवत्त्वावगाहित्वज्ञाने इत्यर्थः। साध्यत्वसाध्यत्वग्रहः। कृतिसाध्यत्वौदनादिसाधनत्वप्रकारकत्वविभिन्नावच्छेदकद्वयविषयकज्ञाने
कस्मिन्धर्मिणि विरुद्धोभयप्रकारत्वनियमादिति भावः। नचैकस्मिंस्तिभावाभाववत्त्वज्ञानवत्सिद्धत्वासिद्धत्ववत्त्वज्ञानयोरपि परस्परं विरोधित्वादित्यभिप्रा
नः। असिद्धत्वमुत्पत्तिकालीनत्वं स्वनिष्ठसमयसंबंधध्वंसाभावाधिकरणक्षणवृत्तित्वमितियावत्। सिद्धत्वं स्वनिष्ठसमयसंबंधध्वंसाधिकरणक्षणवृत्तित्वपर्य
गादेर्व्याप्यारसंबंधेन स्वगर्भापर्यवहितपूर्वक्षणोत्पत्तिः। न विरोधः इति। नैकावच्छेदेनैकत्रावर्त्तमानत्वमित्यर्थः। स्वरूपगतत्वेन तादात्म्यसंबंधेनाधिकरणस्वरूपावच्छि
न्नत्वविभिन्नावच्छेदकावच्छेदेनैकस्मिन्नधिकरणे वर्त्तमानत्वं नाघ इत्याहृपादिदृहेति। स्वरूपनिबंधनेन तादात्म्यसंबंधेनाधिकरणस्वरूपावच्छिन्नेन स्वरूपं पाकादि
स्वरूपं सिद्धमसिद्धं चेति तयोः साधनत्वसाध्यत्वव्याप्यकत्वादिति भावः। व्युत्पत्तेर्ग्राह भिन्ननिरूपितत्वेपीति विभिन्नावच्छेदकावच्छेदेनैकत्राधिकरणे वर्त्तमानत्वेपी रम॰
त्यर्थः। विरुद्धत्वपतिशेषः। सिद्धत्वासिद्धत्वे इति। अनवगम्यस्य विषयीकृत्यज्ञानादिति। पाकादौ कृतिसाध्यत्वौदनादिसाधनत्वयोः समूहालंबनज्ञान एव तथा

नियमादिति भावः। केचित्तु समयभेदोपाधिकः सिद्धत्वासिद्धत्वदशारूपसमयभेदावच्छिन्नः कृतिसाध्यत्वोद्देश्यसाधनत्वयोः संबंध इति व्याचक्रुः। तन्नु भिन्नं निरूपि
तत्व इति पूर्वमेवाभिधानात्संदर्भविरुद्धमिति ध्येयं। नन्तु धर्मिणि विभिन्नावच्छेदकद्वयवत्तावगाहित्वेनैकधर्मिणि विरुद्धोभयप्रकारतापातं तन्मतेपि तु प्रकारीभूतविरु
द्धोभयधर्मे विभिन्नावच्छेदकावच्छिन्नत्वावगाहित्वमेव तंत्रं। इष्टे समताग्रवत्तमसनवगतस्यापीष्टहेतोः येकविषयोगो न मलं इति विरुद्धोभयप्रकारकत्वयोरुपात्तत्वाच
प्रकृतेपि पाकादौ सिद्धत्वासिद्धत्वमनवगतस्यैव सिद्धत्वासिद्धत्वदशाविच्छेदेन कृतिसाध्यत्वेष्टसाधनत्वग्रहः स्यादिति तदभिप्रायेनाशंकते। इदानीमिति। अनुमाना
न्नारदशानां विषयितोवानाघट इत्याह इदानीमसिमेति। ध्वंसप्रागभावादिकपाकस्य निष्पत्ति अकेरेदेवानीपदार्थत्वात्तद्ध्वंसाधिकरणक्षणस्य चाग्रिमपदार्थत्वादिति भावः।
स्यननुगमेनेति। तदीनीसाधारणस्य तदग्रिमक्षणसाधारणस्य चानुगतानतिप्रसक्तव्यापकतावच्छेदकस्याभावेनेत्यर्थः। व्याप्त्याग्रहादिति। मत्तांतरे इदानीतन
कृतिसाध्यत्वाय निष्प्रपदशायां व्याप्तिग्रहासंभवादित्यर्थः। नोत्यइत्याह। शब्देनेति। अननुगततयातेनरूपेणाप्यस्याभावादिति भावः। नन्वननुगतत्वापनेव विधेः
शक्तिरित्यतस्त्वाह। गौरवाच्चेति। कृतितः सिद्धमिति। कृत्यधीनसमयसंबंधस्वविशिष्टमित्यर्थः। सिद्धत्वेष्टसाधनत्वयोर्विरोधाभावादिति भावः।
सिद्धासिद्धत्वेन ज्ञाने। ज्ञानाभावादिति। सर्वत्र तादृशलिंगाभावादिति भावः। ननु कारणतावच्छेदकविशिष्टतादृशायामेव कारणत्वमिति कृ
तिसाध्यत्वेनोद्देश्यसाधनत्वादौ दृष्ट्वा साधनत्वादृशायामपि कृतिसाध्यत्वमित्याशंकते। नवेति। साधनत्वमपि साध्यमितिः साधनतादशा
यामपि कृतिसाध्यत्वमित्यर्थः। उक्तमिति। लाघवात्या कृतत्वेनैव हेतुत्वादिति भावः। इदमुपलक्षणं कृत्यधीनसमयसंबंधवृत्तिरूपस्य कृतिसाध्य
त्वस्य पाकादावुद्देशानाद्युपधायकत्वदशायामसंभवाद्वैयर्थ्यंपि बोध्यं। कृतक्रियमाणाविलक्षणमिति। अतीतत्वानाद्यक्षणवर्तित्वदशाव्याप्तत्त्वामित्व

चि॰टी॰ र्थः। कृतं यं नंतरेति। कृत्यधीनसमयसंबंधवत्वमित्यर्थः। साधनत्वविरोध्येवेति। ओदनादिसाधनत्वस्योपायोपाकादावक्षतेरित्यर्थः। ननु यथोक्तसिद्धत्वा
सिद्धत्वज्ञानयोः परस्परं विरोध्यविशेषिभावेमानाभावात्। व्याकांक्षोद्युगपत्सिद्धत्वासिद्धत्वज्ञानेवाधकाभावः। किंचास्ति तयोः परस्परं विरोधित्वं तथा
प्यवच्छेदकधर्मवगात्वैवविरुद्धयोरेकत्रप्रतीतिरिति नियमेमानाभावः। अवच्छेदकविनिर्मोकेनापि द्वयोः संयोगतदभावयोरिव प्रतीतिमत्यपदर्शना
दित्यस्वरसादाह। किंचेति। साधनत्वस्य स्वर्गादिसाधनत्वस्य सिद्धमात्रधर्मत्वात् सिद्धत्वव्याप्यत्वात्। सिद्धत्वसमयसंबंधध्वंसवत्वं हि लौकिकपदार्थे स्वर्गा
दिसाधनत्वविरहात् कृतिसाध्यत्वं च न तादृशसिद्धत्वव्याप्यं उत्पत्यात्मकहानिकपदार्थेपि तस्सत्वादिति भावः। केचित्तु साधनत्वस्य सिद्धमात्रधर्म
त्वात् तन्निष्ठसिद्धतादृशमात्रे हेतित्वात्। कालिकसंबंधेन तन्निष्ठसिद्धत्वव्याप्यत्वादित्याहुः। तन्निष्ठसिद्धत्वं च तदीयसमयसंबंधध्वंसवत्वं साधनत्व
स्य फलसमयवर्त्तित्वघटितत्वेनोत्पत्तिकाले साधनत्वविरहादिति भावः इत्याहुः। इच्छाविरोधीति। उद्देश्यतयेच्छात्यत्तौ विरोधीत्यर्थः। न च सिद्धत्वज्ञानस्ये
च्छां प्रत्यविरोधित्वान्न व्याप्यवत्ताज्ञानत्वेनेच्छाविरोधित्वे मानाभावः सिद्धत्वस्यापि सिद्धत्वव्याप्यत्वादित्यत आह नहीति। सिद्धं सिद्धत्वेन ज्ञातं न चैवमवन्म
ने कथमिष्टसाधनताज्ञानविशिष्टकृतिसाध्यताज्ञानात् कथं चिकीर्षा साधनत्वज्ञानस्येच्छाविरोधिनः सत्वादिति वाच्यं। अस्मन्मते अन्यथा इष्टसाधनता
ज्ञाननाशे सति विनश्यदवस्थादिष्टसाधनताज्ञानविशिष्टकृतिसाध्यताज्ञानादेव चिकीर्षाकारणतावच्छेदकस्य वैसत्वस्यानपेक्षितत्वात्। एककालावच्छे
देनैकाव्यवहितत्वस्य वैशिष्ट्यतया चिरकालीनेष्टसाध्यताज्ञानमादाय नातिप्रसंगः। यद्वा फलसमयवर्त्तित्वं एव कारणत्वं तदा स्वाव्यवहितोत्तरकालावच्छेदे राम॰
नैकात्म्यवृत्तित्वस्य वैशिष्ट्यतया इष्टसाधनताज्ञाननाशकालोत्पत्त्यात् कृतिसाध्यताज्ञानादेव सर्वत्र चिकीर्षा स्वाव्यवहितोत्तरत्वं च स्वध्वंसाधिकरणक्षण

ध्वंसानधिकरणत्वे सति स्वध्वंसाधिकरणत्वं न चैवं मेककालावच्छेदेनैकात्मवृत्तित्वस्य वैशिष्ट्यप्रवेशे प्रथममिष्टसाधनताज्ञानं ततोऽपेक्षाबुद्ध्या
त्मककृतिसाध्यताज्ञानं तत इष्टसाधनताज्ञाननाशः तत इष्टसाधनत्वज्ञानेन तत्रापि तदनन्तरं चिकीर्षोत्पत्तिः कारणतावच्छेदकप्रवेशत्वस्यानपेक्षितत्वात्।
फलसमपवर्त्तिन एव कारणत्वमते यत्रेष्टसाधनताज्ञाननाशकालेऽपेक्षाबुद्ध्यात्मकं कृतिसाध्यत्वज्ञानं तत इष्टसाधनत्वज्ञानं तत्र तदनन्तरमपि चि
कीर्षोत्पत्तिः। अव्यवहितोत्तरकालावच्छेदेनैकात्मवृत्तित्वस्य वैशिष्ट्यत्वात् फलसमपेक्षकृतिसाध्यताज्ञानसत्त्वाच्चेति वाच्यं। समूहालम्बनादेरपेक्षाबुद्धिना
शनाप्यपत्वानभ्युपगमेनापेक्षाबुद्धेः त्रिक्षणावस्थायित्वासिद्धेरिति भावः। इदं त्ववधेयं। साध्यत्वसाधनत्वयोर्विरोधात् काम्यसाधनतालिंगके कार्य
ताज्ञाने काम्ये हेतुरस्तु नित्ये तु शौचादिमत्त्वविषयककार्यताज्ञानमेव प्रवर्त्तकमस्तु लाघवान्न तु तद्धीजन्यमिति प्राभाकराणां दुःसमाधेयमिति। एतेने
ष्टसाधनत्वज्ञानस्येच्छाविरोधित्वेनेत्यर्थः। तृष्णादाविति। कृतिसाध्यत्वाप्रकारके इष्टसाधनीच्छायामित्यर्थः। उपायेच्छाकारणत्वेनेति। उपायेच्छासामा
न्यकारणत्वेनेत्यर्थः। लाघवादिति भावः। निरस्तमिति तत्रापीष्टसाधनताज्ञानस्योत्पत्तिप्रयुक्ताऽहेतुत्वादिति भावः। तत्साध्येति। सुखादौ दृष्टिसाधनता
ज्ञानादित्यर्थः। इष्टसाध्यं सुखे भवत्विति। नीच्छायामेव सुखत्ववद्द्वेषरपि विषयत्वादिति भावः। सुखदुःखाभावे निःसुखदुःखाभावत्ववन्नवद्द निष्ठानु
बंधित्वे सति इष्टसाधनत्वेन ज्ञाने च्छेत्यर्थः। सुखत्वादिप्रकारकज्ञानजन्यमिति शेषः। तेनेष्टसाधनताधीज्ञानेन प्रवृत्तिरिति ध्येयं। इच्छाप्रयोजक
मिति ज्ञायमानं यदिच्छाप्रयोजकमित्यर्थः। उद्देश्यत्वमिति। ततपुरुषीयोद्देश्यत्वमित्यर्थः। पुरुषार्थत्वं वेदनीयमिति पुरुषार्थत्वपदप्रतिपाद्यमि

वि॰टी॰
त्यर्थः। धर्मान्तरं पदार्थान्तरं अनुगतकार्यस्येति तत्तत्पुरुषीयेच्छासामान्यलक्षणाऽनुगतकार्यस्येत्यर्थः तदेवेति ज्ञायमाने सति। कृतिसाध्यत्वज्ञान
समहितमितिशेषः। दुःखजनकसाधनत्वाहेतुः दुःखत्वेन दुःखसाधनत्वे न च ज्ञाताज्ञात आह निचिकीर्षाप्रयोजकमिति अतएव चैत्यवंदनविषभक्षणादौ संज्ञा
तवाधरशायानप्रवृत्तिस्तदानीमिष्टसाधनत्वादिज्ञानाभावेनेष्टत्वाभावावगतज्ञानस्यासंभवादितिभावः। उद्देश्यपत्वेचस्वकारणीभूतेष्टसाधनत्वादि
ज्ञाननाशनाश्यत्वेनेष्टसाधनत्वादिज्ञाननाशेन तज्ज्ञानमात्रेच्छेत्तिरिष्टत्वं गतं यथा नीतिरिच्छाप्रयोजकमस्तीत्यर्थः। असंभवादिति सुखादेरपि दुःख
सामानाधिकरण्यादितिभावः। एकसमयइति एकदेशकालावच्छेदेनेत्यर्थः तेन शिरःपादावच्छेदेन एकत्रैककालमात्मनि सुखदुःखोत्पादेऽपि न क्ष
तिः सामानाधिकरण्याभावस्येति एकस्मिन्नधिकरणेऽनुत्पद्यमानत्वस्येत्यर्थः अन्यथा सुखदुःखयोरप्येकस्मिन्नधिकरणे एकदावस्थानादसंगतेः
यत्नादीनिरुद्धमुपलक्षणं सुखसाधनाद्यभिरपि इष्टव्यापदवगतमिति येनरूपेण ज्ञानेऽसत्यसतिप्रतिबंधकेऽवश्यं तेन रूपेणेच्छा भवतितत्त्वं तेन
रूपेण ज्ञाते सत्त्वप्रयोजकमित्यर्थः स्वहेतुतयेति स्ववृत्तितयेति स्वरूपकथनं बलवदनिष्टाननुबंधीष्टसाधनत्वेन ज्ञानेऽसतिप्रतिबंधकेऽवश्य
मिच्छोदयेपि यागस्येष्टसाधनत्वस्य तत्राप्रकारत्वात्तेन रूपेण यागादीनामस्वतः प्रयोजनत्वं भोगस्याप्येवंरूपत्वे तस्यापि लक्ष्यत्वमिति भावः। ननु
अन्येच्छानधीनेच्छाविषयतावच्छेदकधर्मवत्त्वं स्वतः पुरुषार्थत्वमस्तु तत्राह किंचेति। न च सुखादीति तु मपथमांतं शंकते तेनहीति सुखादि
ज्ञानरूपादिपदादिच्छाविषयान्तरपरिग्रहः सुखदुःखाभाववत्त्व बलवदनिष्टाननुबंधित्वे सतीष्टसाधनत्वज्ञानसमानकालीनेष्विति शेषः। तेन संज्ञा राम॰
तवाधस्यविषभक्षणादिष्वदासः तद्धर्मस्यनित्यत्वेसंभवेतत्त्वेचजातित्वापत्त्या सादृश्यात्कारत्वादिनासंकरःप्रसंगात्तज्जन्यमेव वाच्यं तज्ज्ञानेनैव तादृश

सुखादित्वानामसत्त्वेकं कारणत्वे व्यभिचारादन्यतमत्वेन तत्कारणतापि महदादेरिवएकधर्मिकत्वेन तादृशसुखादित्वानां नो हेतुत्वं वाच्यं। तथा चेच्छां प्रति तादृशसु
खादित्वानां नानात्वे न रूपेण हेतुत्वमिति किं धर्मान्तरकल्पनयेति परिहरति परंपरा हीति। अन्यतमत्वादिति पाठः अन्यतरत्वादिति पाठस्तु प्रामादिकः। तद्धर्मस्य कृत
रनिष्ठत्वेनान्यतरत्वेन हेतुत्वे व्यभिचारात्। तथेच्छेवैति धर्मान्तरत्वत्कार्य्यकारणभावकल्पने गौरवादिति भावः। न च तज्ज्ञानत्वरितरिक्तं नित्यमस्त्वं धर्मान्तरम
स्तीति वाच्यं तथापि तस्येच्छां प्रति कार्य्यकारणभावात्तरकल्पनमपेक्ष्य विषयेत्तानविषयत्वरूपमकारणव्यक्तिषु सुखादित्वानस्यैवयुक्तसाधनत्वादित्वानविरहका
लीनसुखादित्वानव्याहत्तधर्मान्तरस्य कारणतावच्छेदकत्वेन कल्पयितुमुचितत्वादिति हृदयं। ननु कृतिसाध्यत्वप्रकारकेच्छायाश्चिकीर्षात्वे तद्धनये कलञ्जभक्ष
णप्रागभावे निषेधापूर्वरूपफलजनकत्वादिचिकीर्षाधीनत्वप्रसक्तिः प्रागभावस्य कृतिपूर्वमपि सत्त्वेन कृतिसाध्यत्वस्य तत्र बाधादित्यत आह कृतिसा
ध्यत्वं चेति कृतौ सत्यामग्रिमक्षणे एतदग्रिमक्षणे स्वरूपं कृतिसाध्यतयाभिमतस्य स्वरूपं न कृतिं विना नाप्यग्रिमक्षणे कृतिं विनाप्येतदग्रिमक्षणे तस्य स्वरूपमित्यनुपज
ते कृत्यधीनसमयसंबंधवत्त्वमिति तु समुदितार्थः अधीनत्वं च अस्यैतत्क्षणसंबंधोऽस्याधीन इति प्रतीतिसाक्षिकः स्वरूपसंबंधविशेष इति भावः। एतच्च प्रागभा
वेऽप्यस्तीति दर्शयति। क्षेमेति। एतच्चक्षेमसाधारणमिति यो जनाकृतिपूर्वं विद्यमानोपःकलञ्जभक्षणादिप्रागभावस्तत्साधारणमित्यावृत्त। नन्वेवं कृतेः
पूर्वमपि तादृशकृतिसाध्यत्वव्यवहारः स्यात् अत आह कृतिसाध्यत्वं चेति तथा च धर्मिणः पूर्वं सत्त्वेऽपि धर्मस्य तदानीमसत्त्वान्न तत्कालावच्छेदेन तद्वत्त्वव्यवहार
इति भावः। नन्विति एतादृशस्य कृतिसाध्यत्वरूपत्व इति शेषः। सन्निपत्य धर्मीति स्वर्गादेः अव्यवहितपूर्वं विद्यमानो यः एवंरूपो धर्मी न कार्य्यः यद्योक्तकृतिसाध्यता
विशिष्टः कृत्यधीनसमयसंबंधस्याघक्षण एव सत्त्वादिति भावः। कामिनोऽन्वयइति स्वर्गकामो यजेतेत्यादौ यागविषयकं स्वर्गकामकार्य्यमिति कामिकार्यत्वान्व
यबोध इत्यर्थः। क्षणिकत्वेन विशिष्टस्य फलाव्यवहितपूर्वं सत्त्वे नक्रियायास्तुल्यत्वादिति यथायोग्यमेव स्थिरत्वेन साक्षात्साधनत्वविरहात्तत्परंपराघट

कस्यचानुपस्थितेर्न स्वर्गरूपेष्टसाधनत्वज्ञानं संभवति न च कृतिसाध्यत्वविशिष्टेः पूर्वेपि बाधात्स्वर्गसाधनत्वज्ञानासंभव इति भावः। कामिकार्य्य
तान्वयबोधे च भवन्मते कृतिसाध्यत्वविशिष्टेष्टसाधनत्वस्यान्वयप्रयोजकरूपत्वपायोग्यतात्वादिति भावः। तस्मात्कृतिजन्यतावच्छेदकावच्छिन्नत्वमेव
कृतिसाध्यत्वं तच्च न प्रागभाव इति हृदयं काम्यसाधनत्वमात्रं कामिकार्य्यतान्वयबुद्धिप्रयोजकं न तु कार्य्यताविशिष्टो ऽप काम्यसाधनत्वमिति समाध
त्ते यद्यपीति तत्र कार्य्यताबुद्धेरिति कर्म्मणि षष्ठी तत्र कामिकार्य्यतान्वयबुद्धिप्रतिविधेर्हेतुत्वादित्यर्थः। काम्यसाधनत्वेति कामिकार्य्यतान्वयबुद्धिप्र
योजिकेति विभक्तिविपरिणामेनान्वयते इति व्याप्ति इत्यभ्युपगमः पाके सतीति तद्दैवविशेषेंद्रियसन्निकर्षसंभवादिति भावः। कृतिसाध्यताज्ञानं कृति
साध्यताप्रत्यक्षं नेत्यभ्युपगोचरं कृत्वा नान्तरीयकत्वपाठस्यैव पाके कृतिसाध्यताज्ञानं भविष्यत्यन्यगोचरकृतौ तन्निष्ठकृतिसाध्यताज्ञानस्याहेतुत्वेनात्राप्यो
न्याश्रयाभावादित्यत आह कृतिसाध्यतेति तीति उत्पन्नपाकादावित्यर्थः। तत्र कृतिसाध्यताज्ञानसंभवेपि चिकीर्षाकृत्योरसंभवात्सिद्धत्वधियः प्रतिबंधि
कायास्सत्वादित्यर्थः। तथा च यत्र चिकीर्षा कृतिस्तत्र कृतिसाध्यताप्रत्यक्षमन्योन्याश्रयप्रसक्तामिति भावः। मन्त्रकृतीति इदानीं तनस्वेच्छाधीनमन्यप्रवृत्तिसाध्य
मित्यर्थः। पुरुषान्तरीयप्रवृत्तिसाध्यताज्ञानेप्यप्रवृत्तेः स्वीयप्रवृत्तिसाध्यताज्ञानमेव प्रवर्त्तकमतस्तत्संपन्नपे सदिति बाल्यदशायां भाविदोषवारणाय प्रवृत्तिवारणाय
तत्कालीनप्रवृत्तिसाध्यताज्ञानमेव प्रवर्त्तकमतस्तत्संपन्नपे इदानीं तनेति प्रवृत्तिविशेषणाय तत्तावच्छेदकमापानाधिकरण्येन साध्यत्वसिद्धेरुद्देश्यत्वान्तनय
रकृतत्पाके स्वीयकालान्तरकृतेश्च पाके: शतो बाधः जीवनयोनिकृतिसाध्यताज्ञानेप्रवृत्त्यसाध्यताज्ञाने च प्रवृत्तेरनुदयात्प्रवृत्तित्वेन प्रवृत्तिसाध्यताज्ञानमेव
प्रवर्त्तकमतस्तत्संपन्नपे कृतित्वं विहाय प्रवृत्तित्वेन साध्ये प्रवेशः संजानवाधे दशायां चैत्यवंदनादौ प्रवृत्तिवारणाय इष्टसाधनताज्ञानजन्यकृतिसाध्यताज्ञा
नस्यैव प्रवर्त्तकत्वापातात्तत्संपन्नपे हेताविष्टसाधनताप्रवेशस्यावश्यकत्वपात्तत्सार्थक्याय स्वेच्छाधीनेति स्वविषयकेच्छाधीनेत्यर्थः परंतु भ्रमे प्रवृत्तिवारणाय स्वेच्छा
धीनायाः प्रवृत्तेस्तत्साध्यताज्ञानमेव प्रवर्त्तकमतः स्वेच्छाधीनेति स्वविषयकेच्छाधीनेत्यर्थकमिति तत्तु च्छद्मभ्रमे प्रवृत्तिवारणाय स्वेच्छाधीनत्वस्य स्वरूपसतएव कारण

तिपिधानमात्रपदज्ञानं विनान पिधानान्वयबोधकमित्यर्थः। शब्दकल्पनेपि चेह शब्दोपस्थितिकल्पने लक्षणायामिति लक्षणास्थले व्यभिचार इत्यर्थः।
घोषादिपदस्य तीरशक्तिपदज्ञानं विनापि तीरान्वयबुद्धिजनकत्वादिति भावः नन्वनुकूलपदज्ञानत्वेन हेतुत्वमनुमतो न व्यभिचार इत्यत आह चेराहु नवेति तवनैया
यिकस्य पतेपि पचतीत्युक्तेनाक्षिप्तेन अनुमितेन कर्त्रा चैत्रादिनान्वयबोधाच्चेत्यर्थः। इत्थं च प्राचीननैयायिकमतानुसारेण नव्यमते तत्रापि मयमात्त चैत्रा
दिपदाध्याहारादेवान्वयबोध इति ध्येयं। द्वारपदसहभावमात्रे द्वारपदोपस्थितिसामानाधिकरण्यमात्रे पिधेहि शब्दस्यापि धेहि शब्दोपस्थितेः द्वारपदो
पस्थित्यधिकरणेपि शब्दोपस्थितिमात्रे कथ्यते न तु केवल पिधानोपस्थितिरित्यर्थः। लाघवादिति अर्थाध्याहारपक्षेपत्र पिधेहि शब्दमात्रप्रयुक्त
तत्रापि पिधेहि शब्दज्ञानस्यैव पिधानान्वयबुद्धिजनकत्वकल्पनीयं द्वारमित्येतन्मात्रप्रयोगे द्वारपदज्ञानस्यैव तज्जनकत्वकल्पनीयमिति कारणता
तादृपकल्पनायां गौरवमित्यभिमानः नन्वभिधानोपस्थापककाले कथं शब्दावर्त्तते विनिगमनाविरहेण कस्योपस्थितिर्भविष्यतीत्याशंक्य
निराचष्टे भार्यात्वादिना संस्कारे तिसद्विषयसंस्कारस्यैवोद्बुद्धस्यैव सत्त्वेरित्यर्थः क्वचिदनेकस्मरणोत्पत्तेरित्यपि द्रष्टव्यं तदिदं नाक्रमणमित्यत आह आकां
क्षादिमदिति आकाङ्क्षादिमत पिधानादिरूपप्रतियोग्यन्वितेत्यर्थः। आकांक्षादिमदिति तु स्वरूपकथनं स्वार्थपरत्वस्य स्वार्थान्वयबोधजनकत्वस्य लब्धत्वा
त् द्वारपदज्ञानस्य लब्धत्वात्। द्वारपदज्ञानस्यापि द्वारमित्यादौ द्वारकर्मपिधानानुकूलकृतिमान् एतादृशान्वयबोधजनकत्वांगीकारादिति भावः। केचित्तु द्वारमि
त्यादौ पिधानलाक्षणिकस्थले पिधानान्वितस्वार्थान्वयबोधजनकत्वस्य द्वारपदेऽलब्धत्वादित्यर्थः। लाक्षणिकपदस्याननुभावकत्वादिति भाव इत्याहुः लाघ
वेनान्वाध्याहारादिति लाघवेनान्वाध्याहारकल्पनादित्यर्थः। पिधेहि शब्दोपस्थितिं कल्पयित्वा तदर्थोपस्थितिरवश्यं कल्पनीयेति तु भयकल्पनायां गौरवादि

वि॰टी॰

तिभावः। नष्टेति जनितशाब्दबोधानीत्यर्थः। अध्याहृते अध्याहृतअर्थे तात्पर्येऽप्याकांक्षाजनितान्वयबोधत्वेन निराकांक्षत्वादस्मन्मतेतु अध्याहृतपदआ
कांक्षाविरहेपि नक्षतिः अध्याहृतपद एवाकांक्षासंभवादितिभावः। भूतान्वयबोधाप्युत्पत्स्यतेत्यर्थः। तात्पर्याकांक्षामत्वात्कथं तर्हीतिपमुद्देखलघ
दुर्थोपस्थितिरपिहेतुस्तर्हीरित्यर्थः। समभिव्याहृते उभय खलकल्पनापाद्युपस्थितिदशायामपि समभिव्याहृतमात्रान्वय इत्यर्थः। तात्पर्यनियमात् तात्पर्य
ज्ञानस्यनियमकत्वात्। पत्परः पत्तात्पर्यमिति। शाब्दार्थः शाब्दजन्यज्ञानविषयः। अन्यथा तात्पर्यज्ञानस्यानियामकत्वेतरपीति ओदनं पचतीत्यत्रेतिशे
षः। देववशसंपन्नेति देववशात्तस्य तेरित्यर्थः। क्वचित्तथैव पाठः। उपस्थितेपि तेन कर्त्राप्ये नअनभिधानादिति। आख्यातादिनाप्रबोधनादित्यर्थः। तृतीयेति
हृदाख्याताभ्यामनभिहितकर्त्तरितृतीयाविधानादितिभावः। अध्याहृते त्विति। आख्यातस्य कृता वेवशक्तिरितिभावः। कर्तृसंख्येति तथा चानभिहितइत्यधिकार
सूत्रस्य हृदाख्याताभ्यां कर्तृत्वात् तत्संख्यान्यतरानभिधाने कर्तरितृतीयेति निष्कृष्टोऽर्थः इतिभावः। अन्यतरत्वेनोपादानाद्देवदत्तः पाचक इत्यादौ च न प्रत्य
पादिना कर्तृगतसंख्यानभिधानेपि तृतीया कर्तुरेवाभिधानादिति ध्येय देवदत्तस्येति अत्र घञा कर्तृस्तद्गतसंख्यापाद्यानाभिधानादितिभावः। ननु अभि
हिताधिकारोपरि तृतीयाविधायिकास्य तिरेतरति रिक्तस्थलपराद्यजाद्व्योगेषष्ठ्या तृतीयापवादकत्वात् न च तथापि देवदत्तस्य पाक इत्यर्थे बोधनीये
पत्रदेवदत्तस्येतिमात्रमुच्चरितं न तु तृतीयापरदे कृद्योगाभावादाख्यातकृता कर्तृ स्तत्संख्याया अभिधानाच्च तृतीयापत्तिरिति वाच्यं तत्रापि घञंतपा
कादिपदस्य वक्तुरभिप्रायविषयतयातिरिक्तस्थलस्यैव तृतीयाभिधायकसूत्रविषयकत्वादित्यत आह तात्पर्यतइतितृतीयाविधायकसूत्रता राम॰
त्पर्यइत्यर्थः। तुल्यमितिदेवदत्तस्य पाक इत्याद्यतिरिक्तस्थले पत्र कर्तृगतसंख्यान्यतराभिधायककृदाख्यातान्यतरक्रियापदं वक्तुरभिप्रेतं तत्र न तृतीयाप
ति

प

त्वतुश्चोद्यन्नभिधायकहरणाख्यार्तात्क्रियापदं वक्तुरभिप्रेतं तत्तीयेति वैयाकरणानां तेनात्मर्थ्यादेव दत्तश्चोदनं मित्यादौ न तत्तीयात त्र पचतिपदस्य वक्तुरभि
प्रेतत्वात्। न चैवं शब्दाध्याहारः सिद्ध एवेति वाच्यं। पदस्य वक्तुरभिप्रेतत्वेपि श्रोत्रा तदनध्याहारादित्यर्थः॥ अन्वयप्रतियोगीति पिधानान्वयप्रतियोगीत्यर्थः।
तदस्याशंकानिराकरोति न त्विति तदुपस्थापकेति पिधानान्वयप्रतियोग्युपस्थापकेत्यर्थः गोत्वादित्युपलक्षणं यावत्पदस्य कुत्राप्यसंभवाद्वेत्यपिद्र
ष्टव्यं एवं तादृशान्वयप्रतियोग्युपस्थापकेत्यर्थः गोत्वादित्यपशब्दपिधानान्वयप्रतियोग्युपस्थापकपदमितियावत् पिधानान्वयबोधेपीति स्वव्याहृतपिधाना
न्वयबोधस्थलेपीत्यर्थः। तत्रापि पिधानान्वयप्रतियोग्युपस्थापकपदस्याधारमित्यस्यैव सत्वादिति भावः। ननु लाघवात्तदुपस्थापकपदार्थ न तत्शाब्दबु
द्धित्वहेतुर्हेतुमद्भावो न तु तदन्वयप्रतियोग्युपस्थापकपदत्वेन गोत्वादित्यत आह अन्यथेति तदन्वयबोधं प्रति तदुपस्थापकपदत्वेन कारणत्वे इत्यर्थः।
गौरोति गौणलाक्षणिकस्थलेऽन्वयबोधाभावापत्तेरित्यर्थः। तयोः गौणलाक्षणिकपदयोः ननुभावकत्वात्। पदार्थोपस्थापकत्वात् एवाहादिहृपश
ब्दोपस्थितेरेवलक्षण्योरिकान्तुल्यकशब्दोपस्थितिरिति माचोसिद्धान्तादिति भावः। तदप्रमर्याध्याहारएवेपत्तनिष्कर्षः तथा च बुद्धौ पदज्ञत्वेवत
दुपस्थितिर्हेतुरिति न नियमः तथा च बुद्धौ पदज्ञानविशिष्टतदुपस्थितित्वेन विजातीयत्वेषपकत्वेन वा हेतुत्वकल्पनामपेक्ष्य लाघवात्तदुपस्थिति
त्वेनैव हेतुत्वेऽरिस्यात्पदज्ञानविशिष्टत्वाप्रवेशादतिरिक्तजातिकल्पनाविरहाच्च द्वारमित्यादौ अध्याहृतेनापिधानादिनान्वयबोधदर्शनेन तथाका
र्यकारणभावे व्यभिचाराच्च न च तत्रापि पिधेहि शब्दएवाध्याक्रियते इति वाच्यं गौरवादित्वाभाच्च न च पिधानशाब्दबुद्धिं प्रतित्वेति लक्षणासंबंधेन प्र
धानप्रकारकत्वसत्त्वावच्छेदककर्मावच्छिन्नशाब्दविशेष्यकज्ञानत्वेन हेतुतया विधेहिशब्दस्य उपस्थितिरावश्यकीति वाच्यं तादृशकार्यकारणभावेमा

तुा

चि.टी०

नाभावात न चैव मोदनं पचतीत्युक्ते कारणतया स्मारितस्याकाशस्य प्रत्यक्षादिनोपस्थितस्य कलापादेश्चान्वयबोधापत्तिरिति वाच्यं। मतितात्पर्य्यश्रा
हदृष्टापत्तिः अन्यथा तत्रापि ओदनं पचतीत्युक्ते देववृत्तस्मृतकलाचपदोपस्थितेन कलापेनान्वयबोधस्य दुर्वारत्वादिति दिक् क्रियापदेभि धातुपदेत्यर्थः।
क्रियापिधानादि कारकपदे ति आत्मापदेत्यर्थः कारकं कर्मत्वादिआकांक्षेति परस्परं शाब्दबोधविषयो भवतीत्यर्थः अन्यथेति यथाकथंचिदुपस्थि
तिक्रियादिमात्रस्यैव परस्परं शाब्दबोधविषयत्वइत्यर्थः। क्रियाकर्माध्याहारइवेति क्रियाकर्मरूपार्थाध्याहारस्येवेत्यर्थः। इदंचपदमाश्रित्य दार्ष्टान्तिकेऽप्याकांक्षे
त्याचार्यमते ननन्वनयेपि कर्मता विशेष्यकाधेयतासंसर्गकद्वारप्रकारकशाब्दबोधे द्वारमित्यादावनुपूर्वी विशेष्यकृति विशेष्यकानुकूलत्वसंसर्गकपिधान
प्रकारकान्वबोधे च पिधेहीत्यानुपूर्वी विशेषस्याकांक्षात्वेनावश्यकत्वमन्यथाद्वारकर्मत्वेपि धेहि द्वारपिधानं कुर्वितिरित्यत्रापि ताद्दशान्वयबोधापत्तेरिति केव
लपिधेहीत्युक्तौ द्वारमित्यस्य केवलं द्वारमित्युक्तौ पिधेहिपदस्याध्याहारआवश्यकइतिध्येयं। एवं वियेति द्वारकर्मतेत्यादिपदेत्यर्थः अकांक्षाशाब्दबोधेच्छा
आकांक्षापरस्परं शाब्दबोधेच्छापनिनुद्वारकर्मत्वमित्यादौ भेदान्वयबोधे। साधुत्वज्ञानमेवप्रतिबंधकमित्याशंकनेऽर्थविशेषेऽसाधुत्वादिति द्वारः क
र्मत्वमित्यादौ भेदान्वयवेसाधुत्वादित्यर्थः तत्रसाधुत्वंचतद्जनकतत्पापाशिन्याद्यभिप्रेत असाधुत्वादिति क्रियाकर्मभावेनान्वयबुधिजनकतत्पापा
धायक शिन्याद्यभिप्रेतत्वादित्यर्थः। ननुअसाधुत्वस्य फलोपत्तपातत्रान्वयबोधेन दृष्यते तत्रैवासाधुत्वंकल्प्यते न हि द्वारमित्यत्र पिधेहीति पदं विनानान्वयबो
धदृष्टतु भयसिद्धमित्यरुचेवाह। साधुत्वज्ञानस्येति। निरुक्तासाधुत्वाभावज्ञानस्येत्यर्थः तथाच जनकीभूतज्ञानं विघटपतएवज्ञानस्य प्रतिबंधकत्वं ता धेकर
साधुत्वज्ञान प्रतिबंधकमितिभावः गौरवेनान्यथासिद्धिमुक्त्वा व्यभिचारमप्याह अपभ्रंशादपीति साधुत्वज्ञानस्य हेतुत्वासिद्धेरिति भावः। ननु द्वारकर्मत्वे एम०

पिधेहि द्वारं पिधानं कृतिरित्यादेरेकदेशनिराकांक्षस्थले किं पाककर्मभावेनान्वयबोधे इष्टापत्तिः सत्येकदेशमाकांक्षस्थले अन्वयप्रतियोग्यन्तरस्य यथाकथंचिदुप
स्थितेरेव शाब्दधीहेतुत्वाभ्युपगमेन प्रत्यक्षानुमानादिना तदुपस्थितिवन्निराकांक्षपदजन्योपस्थितितोपि शाब्दबोधे बाधकाभावात् न चानुभवविरोध
इति वाच्यं तथा सति पदजन्यपदार्थोपस्थितिं विनान्वयबोध इत्यनुभवाभावादेशब्दाध्याहारसिद्धिविवादपर्य्यासेः न चैवं द्वारादिविशेष्यकपिधा
नादिप्रकारान्वयबोधे पिधेहीत्याद्यानुपूर्वीविशेषस्यैवाकांक्षात्वात्तस्य हेतुत्वमुपेयं तेन वाऽर्थाध्याहारस्थले एकदेशनिराकांक्षस्थले च व्यभि
चारः कर्मत्वं पिधाने कृतिरित्यादिसर्वनिराकांक्षस्थलेपि द्वारकर्मकपिधानानुकूलकृतिमानित्यन्वयबोधाय तैरर्थोपस्थितेस्तुल्यत्वादिति वाच्य
यो ।तत्तदानुपूर्वीविशेषाकांक्षाया निष्पन्नस्याव्यवहितोत्तरवर्त्तितादृशतादृशान्वयबुद्धिं प्रत्येव हेतुत्वेनाव्यभिचाराभावात् अर्थाध्याहारादिस्थलीया
न्वयबोधस्य तदनव्यवहितोत्तरवर्त्तित्वात् न चैवं सर्वनिराकांक्षस्थलेपि अर्थाध्याहारादिस्थलवद्द्वारकर्मकपिधानानुकूलकृतिमानित्यन्वयबोधा
पत्तिर्दुर्वारेति वाच्यं द्वारकर्मकपिधानानुकूलकृतिमानित्यन्वयबोधो हि पिधेहि द्वारमित्याद्यानुपूर्वीनिष्पन्नाव्यवहितोत्तरद्वारप्रकारककर्मत्वविशेष्य
कान्वयबोधत्वाच्च पिधेहीत्याद्यानुपूर्वीनिष्पन्नाव्यवहितोत्तरवर्त्ति पिधानप्रकारककृतिविशेष्यकान्वयबोधत्वाच्च। तदनिरुक्तस्थलीका
तथा च अन्यतरविशेषसामग्रीविरहादेव सर्वनिराकांक्षस्थले तादृशान्वयबोधः एतेन यथाकथंचित्पदार्थोपस्थितिमात्रस्य हेतुत्वेऽन्वयप्रतियोग्युप
स्थापकपदमात्राश्रवणेऽपि पतत्किं विहङ्गोहानदृशायामुस्खलपदार्थोपस्थितिमात्राच्छाब्दबोधप्रसङ्गः तथा च भट्टमताविशेषः न च तदन्वयप्रतियो
ग्युपस्थापकपदत्वेन हेतुतया न तत्रान्वयबोध इति वाच्यं साक्षात्परंपरासाधारणस्य तदन्वयप्रतियोगित्वस्यानुगतानतिप्रसक्तस्य दुर्वचत्वात्। तद्वृत्तिपद

त्म १ त्म न

वि॰टी॰ ज्ञानत्वापेक्षया गुरुत्वाद्वेत्यपि निरस्तं तत्रापि विशेषणसामर्थ्यविरहादेव शाब्दबोधाभावोपपत्तेरित्यर्थः स्वरसस्तु हापि चेति केचित्तु न तु पदस्मारितपदा
र्थजिज्ञासाव्यपि शाब्दबोधात्प्राप्यानुपदी विशेषः। तस्यानुनुगतत्वेपा। नं तत्कार्यकारणभावापत्तेः किन्तु घटकर्मत्वमित्यादिपदविशेष्यजन्यपदार्थोपस्थि
तिरेवाकांक्षा सा चार्थाध्याहारस्थलेऽप्यस्ति नास्ति च सर्वनिराकांक्षस्थले प्रकाशे निराकांक्षस्थले चेति न तत्रान्वयबोध इति किं पदाध्याहारेणेत्यत आ
ह। अपि केचित्तु तद्समभेदकस्थ नां विशेषणविशेष्यभावभेदेनानन्तकार्यकारणभावापत्तेः अन्वयप्रतियोग्युपस्थापकपदमात्रमत्रवृत्तोऽपि पदा
र्थोपस्थितिमात्राच्छाब्दबोधप्रसंगस्य दुर्वारत्वाच्च तदन्वयप्रतियोग्युपस्थापकपदत्वेन हेतुत्वस्य। (तत्कर्मेणावत्कुमशक्यत्वादिति ध्येयं।) सकर्मिक क्रि
यापदयोगं विनेति सकर्मकत्वं क्रियापदैकवाक्यताइत्यभिप्रायेविषयत्वं विनेत्यर्थः। द्वितीयानुपपत्तेरिति र द्वितीयायाः साधुत्वानुपपत्तिरित्यर्थः। पाणि
रा नि च तन्नैयाप्यापनुशासनेक इतिस्तथैव निर्णीतत्वादिति भावः साधुत्वं च धर्मविशेषजनकत्वं वा क्रियापदार्थप्रयोग इति वस्तुगत्या सकलकर्मक
न क्रियापदस्याऽर्थस्तद्विशिष्टार्थबोधकत्वाभिप्राय विषयत्वमेवेत्यर्थः। द्वितीयेति स्याद्धीति शेषः। द्वितीयापत्तेः। द्वितीयायाः साधुत्वापत्तेः कर्तर्यनुपपत्ते
रिति कर्मत्वपरचतुर्थ्याः साधुत्वापत्तिरित्यर्थः चतुर्थी कर्मत्वपरचतुर्थी स्याद्धीति शेषः। तज्जन्योपस्थितिरेवेति। द्वारमित्याध्याहारस्थलेऽपि पदज्ञान
जन्यपदार्थोपस्थितिरन्वयबोधोपयिकीत्यर्थः तथा च नोक्तव्यभिचार इति भावः। तस्यादिति व्यभिचाराभावेनेति शेषः। नन्वेवं पचतीत्यादौ कर्त्रोपि स
स्थलेऽनुमितेन चैत्रादिना कथमन्वयबोधः। तत्र न येऽपि पदजन्यपदार्थोपस्थितेरेव शाब्दबोधादित्यत आह कल्पद्वेप इति तत्रापि प्रथमांत चैत्रादि राम॰
पदाध्याहारादेवान्वयबोधः त्वेनुमितिचैत्रादिना कर्त्रोपेक्षपसात्याह प्रवादस्याप्यन्याह्य प्रथमांत दोषस्याप्युक्तत्वमेवार्थो न तत्त्वनुमानेत्यर्थामितिभावः

धा

।इदमप्याप्ततः गेह इत्यादिपदं विनापि पत्र घटोस्तीत्याप्तैरभिहिते तत्र गेह इत्यादिपदं विनापि साधुत्वपदाध्याहाराभावेन व्यभिचारस्य दुर्वारत्वात्।
सकर्मकक्रियापदयोगस्य च्छित्तिपादेः साधुतानियामकत्वे ऽभिप्रायेण्यस्य बोध्यापकस्तुरुरिष्टं एजपेदित्यादिविशिष्टवाक्यस्याशुसाधुत्वात्तदर्थ
भिप्रायघटितस्य सकर्मकक्रियायोगतत्राप्यभावात्। किंच साधुत्वार्थवत्कुरेकवाक्यताभिप्रायविषयत्वरूपस्य सकर्मकक्रियापदयोगस्यावश्य
कत्वेप्यात्तत्वादशपदाध्याहारस्य कथमावश्यकत्वम्। न च हेतुविधया सकर्मकक्रियापदादियोगस्य साधुत्वज्ञापकत्वात् साधुत्वज्ञानार्थं तज्ज्ञानमा
वश्यकं तदेव पदाध्याहार इति वाच्यं। साधुत्वज्ञानस्य शाब्दबोधाहेतुतया तद्ज्ञाने पिच्छितिविरहात्। अस्तु वा शब्दाध्याहार आवश्यकस्तथापि तज्ज
न्यपदार्थोपस्थितित्वेन तोता हेतुत्वे लाघवात्। पदार्थोपस्थितित्वेनैव हेतुत्वस्योचितत्वात्। न चाव ओदनं पचतीत्यादौ सति तात्पर्येप्यहेतुपयोः कथंचिद
उपस्थिताकाशकल्पादेर्वाप्यन्वयबोधः ए चेत्यर्थाध्याहारपक्षेप्येवसम्यगित्यवधेयं। शब्दपरिच्छेदरहस्ये आसत्तिग्रंथरहस्य॥ आसत्तिं निरूप्य तात्पर्य

य

निरूपयितुमाह। तात्पर्याधीनमिति॥ तात्पर्याधीनं तात्पर्यज्ञानसापेक्षं। शाब्दप्रमाणं शब्दस्यानुभवजनकत्वं तात्पर्यस्य ज्ञानमपि शब्दस्य सह
कारीति फलितार्थः। एतेनासत्यासहशाब्दबोधलक्षणे केकार्यानुकूलत्वं संगतिरिति सूचितं। यद्यपि दंतरस्येतरेत्यादिना तात्पर्यं प्रागेवोपवर्णि
तं तथापि परमतनिराकरणाय पुनरपमारंभ इतिस्मर्त्तव्यं। तत्परंपरस्य सततत्व रक्तस्वभावस्तात्पर्यं पर शाब्दस्य कार्यवादी तथा च तत्कार्यकात्वमेव
तात्पर्यं भवति च घटादिपदं प्रतीतिकार्यकमतो घटादिप्रतीतिपरमितिव्यवस्थास्कृतशब्दार्थमाशंक्य निराकरोति। तत्रेति। विषयत्वसमग्र्यर्थः। अन्वयश्चा
स्य तत्परत्वमित्यनेन तथा वतद्विषयीभूतेत सत्परत्वमित्यर्थः। तत्साधककत्वे तत्कार्यकत्वे पद्यात्तज्ञानतात्पर्येनिष्टत्वसपरत्वमिति भावस्य धानेनि

य

चि.टी०

र्दित्पः। एवं तत्साधकत्वमित्यपि तथा च तन्निष्ठं तत्वत्वेन तत्साध्यसाधकवित्वमित्यर्थः॥ शब्दासाध्यत्वादिति। शब्दाजन्यत्वादित्यर्थः। तथा च घटादि
पदघटितत्वसंसर्गादिपरमितिव्यवहारो न स्यादिति भावः। तदङ्गोचरमफलं जनिमिज्ञेति तदङ्गोचरमपत्नेत्यर्थः। यथाश्रुते एकस्य वाक्यस्योभयसाधकता
दसंभवापत्तेः प्रत्येकसाधकत्वस्य वैकल्पिकत्वप्रमाणत्वे तत्पापप्रत्याय्याप्त्यापत्तेरिति ध्येयं। तच्च प्रपन्नकार्यकत्वं च इष्टार्थस्य विधिवाक्यस्य सत्त्वादिष्व
साधनत्वादिज्ञानद्वारा प्रवृत्तार्थस्यत्विति प्रशंसानिंदावाक्यस्य विशेषपरो विधिभिन्नस्य प्रशंसानिंदावाक्यस्येत्यर्थः। तत्र परिणतिसुरसमाम्रफलं परि
णतिविरसं पनसफलमित्यादिवाक्यमिति भावः। प्रशस्तनिंदितेति उत्कृष्टापकृष्टेनेत्यर्थः। सुशब्दविपर्यये पोहत्कृष्टापकृष्टवाचित्वादिति भावः। नन्वे
वं लाक्षणिकस्य लक्षणीयागोचरमन्यपत्नरगोचरत्वात् लक्षणीपार्थपरत्वं न स्यादित्यत आह। लाक्षणिकस्येति लक्षणीयानुभवद्वारेति शेषः। तत्परत्वं ल
क्षणीयपरत्वं अन्यतरत्वादित्यपरत्वात् तत्परत्वज्ञानेन तज्ज्ञानं तच्छाब्दबोधः। तत्र प्रवर्त्तकत्वं तदङ्गोचरमवत्त्वफलोपधायकत्वं स्वरूपयोग्यतायाः एवमपि स तक
त्वेन शाब्दबोधानपेक्षितत्वात् यथाश्रुतासंगतेः। तत्प्रवर्त्तकत्वं च तदङ्गोचरमपत्नोपधायकतानुचेद्दृ इति परस्पराश्रयादिति। तदङ्गोचरमप्रयत्नत्वफलोपधाने
सति तदुपधायकत्वज्ञानात् शाब्दबोधः तच्छाब्दबोधे जाते एव च तदङ्गोचरमप्रपत्नोपधानादिति भावः। न च तदङ्गोचरमपत्नस्वरूपयोग्यत्वं तत्परत्वमिति वाच्य
। तद्दवच्छेदकरूपापरिचयादिति भावः। ननु तदङ्गोचरमपत्नोपधायकत्वस्य लौकिकप्रत्यक्षेन हेतुः येन तदुपधानेन विना तदुपधायकत्वज्ञानं न स्यात्।
किंतु तदङ्गोचरज्ञानमात्रं तथा चापेतदुपधायकत्वस्यापि यथा कथंचिदुपनयादिवशाज्ज्ञानं भविष्यतीत्यत आह। वैराग्यलाक्षणिकस्येति अननुभावकत्वे राम० ग
पीति अनुभवजनकत्वं विना प्रयत्नजनकत्वासंभवादिति भावः। शक्तिलक्षणान्यतरसंबंधेन तत्तत्पदस्तात्वमपेक्ष्य लाघवाच्छक्तिसंबंधेन तत्पदत्व

प्रतियोगिमत्वदर्शनात्वेनैवहेतुताशक्तिमपेक्ष्यलक्षणायाः शक्यसंबंधात्मकत्वेनगुरुत्वात्।गंगायांघोषइत्यादौचघोषादिपदस्यैवतीरानुभा
वकंननुगंगादिपदंतस्यतीराद्यन्वयप्रतियोगिशक्तत्वाभावादन्वयप्रतियोगित्वंचसाक्षात्परंपरयाऽन्वयनिरूपकत्वंतत्रभेदेपिकेनघटादिपदस्य
नघटाद्यनुभावकत्वानुपपत्तिः सर्वत्वात्लाक्षणिकस्थलेचशक्यबोधएवनोत्पद्यते।किंतुपदार्थोपस्थितिमात्रमितिलाक्षणिकस्यानानुभावकत्वा
दिनांप्राचांनिगर्वः।ननुगंगादिलाक्षणिकपदस्यापितीराद्यनुभवजनकपदार्थोपस्थितिद्वारापदार्थोपस्थितिर्गंगादिपदादेवशाब्दानुभवजन
कत्वंपुनर्नतस्यकिंतुतत्समभिव्याहृतशक्तपदस्येत्येवप्राचीनसिद्धांतइत्यस्वरसादाह।कार्यादेरिति।स्वरूपाख्यानमात्रपरत्वेनापीति।तत्रोचर
ज्ञानमात्रजनकत्वेनापीत्यर्थः।मात्रपदात्प्रयत्नव्यवच्छेदः।पर्यवसानाधीनतत्परत्वाच्छब्दमुपलक्षणं।विध्यादेरपिइष्टसाधनत्वादिपरत्वेनस्यात्
।तत्रोचरप्रवृत्त्यजनकत्वादित्यपिद्रष्टव्यं।नत्वेवंपरिगणितसुरसमित्यादिप्रशंसानिंदावाक्यप्रवृत्तिनिवृत्तिपरमितिव्यवहारोनस्याच्चत्स्यप्र
वृत्तिनिवृत्तिगोचरज्ञानजनकत्वादित्यतआहतत्रेतिः ज्ञानंप्रशस्तंप्रशस्तत्वेनज्ञातेनिंदितात्तन्निंदितत्वेनज्ञानात्।तत्परमुच्यतेइतिप्रशं
सानिंदावाक्यंप्रवृत्तिनिवृत्तिपरमुच्यतइत्यर्थः।तथाचतत्परत्वव्यवहारोभाक्तइतिभावः।गौणलाक्षणिकयोरितिगौणातदितरलाक्षणिक
योरित्यर्थः।गोत्वघावानपेक्षादाविवसादृश्यसंबंधेनलक्षणागौणीवृत्तिः।यथाचंद्रपदस्यमुखेन्ननुभावकत्वादितिपद्यपितस्यानानुभावकत्वेपि
पदार्थोपस्थितिमादायलक्षणासामान्यंतत्राप्यलक्षणेऽतुद्धिपरमतअनुभवपरमित्यभिप्रायः।पदाऽनुभावकत्वात्तत्संसर्गज्ञानाजनकत्वात्।तथाच
तयोःसंसर्गपरत्वंनस्यादितिभावः।एवमग्रेपितद्बुद्धिजननेतदनुभवोपधानेतत्परत्वंतत्परत्वज्ञानं।लक्षणोद्बुद्धित्वेनप्रवेशःऽन्योन्याश्रयो

चि.टी० बोध्यः। अन्यथा पदार्थोपस्थितिं प्रति तात्पर्यज्ञानस्याहेतुतया तामादायैवान्योन्याश्रयपरीहारादित्यवधेयम्। एवमग्रेऽपि बोध्यं। एकत्रोच्चारणाद
तिएकमात्रप्रतीतौ। तौ छ्या पाउच्चारणे इत्यर्थः। लक्षणायां चेति वक्तुर्लक्षणीयमात्रप्रतीतौ छपाचेत्यर्थः। तत्प्रतिपादकत्वमिति स्वजन्यप्रतिप
त्तिविषयतत्कत्वमित्यर्थः। विशेषणविशेष्यभावभेदाच्च एवंतोभेदः। अन्यत्सर्वं पूर्ववत्प्रवृत्त्यादीति तथा च तत्तत्प्रत्वव्यवहारेण स्पष्टादि
ति भावः। अप्रतिपादकत्वाच्च अननुभावकत्वाच्च स्वार्थाविनाभा वीति स्वार्थाविनाभावसंबंधेन तीरं प्रतिपादयेदित्यर्थः। इदं च तादात्म्यसंबंधाव
च्छिन्नस्वार्थाविनाभावरूपशक्यसंबंध एव लक्षणा न तु संबंधसामान्यमिति प्राचीनमतानुसारेण तथा च तत्प्रतिपत्त्यनुकूलसंबंधवत्त्वेन तत्स्वरूपं
संबंधः शक्तिलक्षणा च पदपदार्थसंबंधेन स एव पदार्थस्मृतिद्वारा संसर्गप्रतिपत्त्यनुकूल इति संसर्गमादाय पर्यवसितारिति भावः। तेन चिनेति
स्वार्थाविनाभावेन चिनेत्यर्थः। ननु मंचसंबंधी पुरुषस्तादात्म्येन मंचव्याप्य एव एवं पुरुषांतरमपि तादात्म्येन येन केनचित्संबंधेन मंचव्याप्य
मं च स्वार्थाविनाभावस्य लक्षणत्वे व्याप्यवृत्तिता तादात्म्यसंबंधनियमेऽपि व्यापकवृत्तिसंबंधानियमादित्यरुचेराह गंगायां घोषदमिति गंगादिप
द मत्स्यादिपरं तीरपदं च मुख्येत्यादिति योजना। मुख्यमुख्यमात्राभिप्रायेण मुख्यार्थमात्रप्रतीतौ छपोच्चारणे इति यावत्। मत्स्यादीत्यादिपदा
त्तीरेतरपरिग्रहः। तीरस्यप्रयुपादानात् अविनाभावस्य स्वार्थाविनाभावस्य। इदमुपलक्षणं संबंधस्यैव सर्वदा सर्वपरत्वस्यात्तल्लक्षणाग्र
व्यावर्त्तकत्वादित्यपि बोध्यं प्रकृतातिव्याप्तिवारकविशेषणामर्शकतो मुख्येबाधकेसतीति मुख्यमित्राप्येवाधके सतीत्यर्थः। मुख्यार्थ रम०
प्रतीतौ तु स्यात्र न स्यादिति तत्तेसतीति यावत् तर्हीति इदमुपलक्षणं तीरप्रतीतौ छपोच्चारणे मत्स्यग्रहादिपरंपरा येनकेनचित्संबंधेन विनाभा

वृस्पतत्रापि संभवादित्यपि वोध्यं ननु मुख्येवाधके सतीतिलक्ष्यपरत्वेन नु मुख्यार्थपरतीयामपीत्यत आह। नस्याच्चेति प्रगच्छ गच्छसि चेत्कांत पं
थानः संतु ते शिवाः ममापि जन्म तत्रैव भूयाद्यत्र गतो भवानिति विदेशगमनोद्यतं भर्त्तारं प्रति उत्कंठितायाः कांतायाः वाक्ये इत्यर्थः। गमनाभावपरत्व
मिति व्यंजनया गमनाभावपरत्वमित्यर्थः। मुख्यार्थाभिप्रायाभाववत्त्वविरहादिति भावः। श्रीकार्यहेतुर्हे कांत त्वं गच्छसि चेद्गच्छ ते तव पंथानः शिवाः कल्या
णरूपाः संतु किंतु ममापि जन्म तत्रैव भूयाद्यत्र भवान् गतः गतार्थ इति गमिष्यर्थे। त्वं नमुत्कं ध्वनितत्वात्करणपारेदनतत्त्वाभिधानं तस्याङ्गाबडुम
नांतरमेव मम मरणं भविष्यतीति त्वत्पानगंतव्यमिति व्यंग्यार्थः। तदर्थस्येति तत्प्रयोजकत्वमित्यत्र तत्पदार्थस्येत्यर्थः। साध्यत्वउपधापकत्वंत्रन्यो
न्याश्रयात् उक्ताः योग्यताश्रयताद्वस्थ्यात्। प्रतिपाद्यतिः तद्गोचरप्रतिपाद्येच्छाविषयत्वं तत्परत्वमित्यर्थः। प्रतिपाद्यश्रोता भवतिचक्रस्मात्शब्दात्
प्रतीतिर्भवत्विति प्रतीतिगोचरेच्छायाः शब्दोपि विषय इति भावः। पक्ष्येति श्रोतुः पुरुषस्येति शेषः। पदिच्छाविषयापद्वस्तु शाब्दगोचरस्समहालेवनेच्छावि
षयः। तेपुरुषप्रतिनित्यारत्वापत्तेरिति तत्तद्वस्तुपरत्वापत्तेरित्यर्थः। तथा च वाक्यभेदापत्तिरिति भावः। तदर्थसाध्यत्वेनेति तच्छब्दार्थविशेष्यकस्वसाध्य
त्वप्रकारिकेनेत्यर्थः। स्वपदं शब्दपरं तथा च स्वसाध्यत्वप्रकारतच्छोचरेच्छाविषयत्वं तत्परत्वं तच्छब्दार्थस्य प्रतीतिप्रवृत्तिनिवृत्ती चेत्युक्तमेव भव
तिवास्माच्छब्दादमुकगोचरप्रतीतिर्भवतु अर्थगोचरप्रवृत्त्यादिर्वा भवत्विति इच्छा प्रतीतिप्रवृत्त्यादौ शब्दसाध्यत्वप्रकारिकासाध्यत्वस्य पंचम्यर्थ
त्वादिति भावः। इहघ्रमइतीति इहघ्रमशब्दो तत्स्यवृत्तिपर इति वाक्यस्यैकदेशोत्कीर्तनेन तथा च इहघ्रम शब्दो तत्स्यवृत्तिपरस्तत्वेत्यर्थः। साध्य
स्य साध्ये पदार्थस्य वाक्यभेदेति एकस्यैव परशब्दस्य विभिन्नप्रकारकेच्छाजनकप्रसंगादित्यर्थः। घ्रमपर इत्यनुरोधात् ज्ञाप्यत्वप्रकारकेच्छा

त्य
६४

चि॰टी॰ पाऽभिधेयपत्वात्तथ्यमस्य थ्यमपदजन्यत्वाभावेन स्वजन्यत्वप्रकारकेच्छायास्तत्रबाधितत्वात्तथ्यमपदत्वमिति परं इत्यनुबोधाच्च स्वजन्यत्वप्रका
रेच्छायाः ऽभिधेयपत्वात्तथ्यमगोचरप्रवृत्तिप्रमादिपदज्ञाप्यत्वाभावेन ज्ञाप्यत्वघटितस्य तत्रबाधितत्वादिति भावः यदा वाक्यभेदप्रसंगात्तत्परशाब्द
ज्ञानभेदप्रसंगात् पुरःशाब्दस्यावृत्तिप्रसंगादिति पावत्सु। सकृदुच्चरितेत्यादिव्युत्पत्तेरिति भावः। मत्विति यद्वा वाक्यभेदइत्यापत्तिरेव अन्यथासिद्धो नेष्य
तु॰र गतेरित्यरुचेर्दोषांतरमाह। प्रमितिच्छ्याऽत इति श्रोतरिच्छायाइत्यर्थः तथा च पत्रवक्तुरेकगोचरस्य तीतौ तस्मिन्श्रोतुर्भ्रांतेर्दिरूद्द्धप्रतीतौ तत्तत्वादिद्दप्र
तीतिपरत्वप्रसंगइति भावः प्रतिपादकेति प्रतिपादकोवक्ता इच्छाविषयत्वं जनकतासंबंधेन तत्प्रकारेच्छाविषयत्वं जन्यतासंबंधेन तद्विशे
ष्यकेच्छाप्रकारकत्वं वा एतदेव विवृणोति पः शब्दइति यदिच्छया जनकतासंबंधेन प्रेत्यप्रकारकेच्छया जन्यतासंबंधेन यद्विशेष्यकेच्छायावाप्रयु त्व
क्तः अर्थसहितः तथा जनकतासंबंधेन तत्प्रकारकवक्त्रिच्छाविषयकत्वं जन्यतासंबंधेन तद्विशेष्यकवक्त्रिच्छाप्रकारत्वं वा तत्परत्वं विनिगा
मकाभावात् भवति चायं शब्दोऽर्थकप्रतीतिमान् भवत्विति जनकतासंबंधेन प्रतीतिप्रकारिकायां इच्छायां धीविशेष्यः शब्दः अर्थकगो
दृ चरप्रतीतिरेतच्छब्दोद्भवत्वितीच्छायां जन्यत्वसंबंधेन प्रतीतिविशेष्यकोपाधिप्रकारः शब्दइति प्रतीतिपरत्वं शब्दस्य एतेन पहेत्यादिपरत्वम
पि व्याख्यातं किंतु प्रतीतिपरमेव शाब्दबोधप्रयोजिनं तु सुव्यत्ययोदिपरत्वे अर्थपरत्वव्यवहारस्तु तत्र च प्रतीतिपरत्वनिबंधनो भाक्त इति भावः न
न्वेवं वक्तृवाक्यस्य श्रोतृशाब्दबोधप्रहत्यादिपरत्वं तस्यां वक्तुरिच्छायाः श्रोतृशाब्दबोधप्रयविषयत्वादित्यत आह स्वाचेति वक्तुनिष्ठान्येत्यर्थः प्रति राम॰
पत्तिश्रोतृ। विषया विषयापिनन्वेवंभानार्थावादेकदावक्तुरनेकप्रतीतिच्छायामिकार्थप्रतीतिप्रसंगइत्यतआह। ननु यथा प्रतिपापेच्छायाअनि
द

ये वक्तु

पमाद्वाक्यभेदप्रसंगस्तथानानार्थादौ प्रतिपादकेच्छायाश्चाप्यनियतात्तमघप्यखेदृश्येयोनानार्थभेदाखेऽप्येपत्तुनेकंपदमितिसकृदुच्चरितेत्या
दिस्ते तोरसिद्धिस्तथापि गोवलीवर्दन्यायात एव गुणादानेपक्षानानार्थाश्रियादिति सामानाधिकरण्येनानार्थानितरेतत्तद्ध्यपरत्वेनैकत्वादिति अनेके
तिघटं चानये त्यादिवाक्यादित्यर्थः मुख्येति मुख्यलाक्षणिकवोवा कुंगापाषोपमत्स्योस्तु इत्यादिगंगादिपदादित्यर्थः। आवृत्येति तत्स्थानेस्थि
तस्यपदस्यपुनरनुसंधानस्यावृत्तिः तदीयस्थलांतरस्थितस्यपुनरेवानुसंधानमनुषंगः। तदीयस्थलांतरस्थितस्यपुनरनुसंधानमनुवृत्तिः सा
चसिंहगुहावलोकनमंडूकप्लुतिगंगास्रोतोवदितित्रिधा। अश्रुतानांनुशब्दानामनुसंधानमध्याहार इतिबोध्यं सकृदुच्चरितस्येति एकपदविषय
कैकज्ञानस्येतार्थः। सकृदर्थापरत्वनियमेन सकृदर्थानुभवजनकत्वनियमनिश्चयेन अनेकार्थानुभावकत्वनियमनिश्चये नेतियावत् सकृदु
च्चरितः प्राक् सकृदर्थं गमयतीतिसिद्धादितिभावः। एकत्रोच्चारणे एकस्मिन्वाक्ये अनेकार्थपरत्वाभावादिति एकदाऽनेकार्थप्रतीतिपरत्वाभा
वादित्यर्थः। उक्तनियमनिश्चयरूपविशेषदर्शनेनैवतु रेकदानेकार्थप्रतीतीच्छानुत्पत्तेरितिभावः। नचैकत्र सर्पं चन्द्रो भयादिप्रतिपादकेपुष्प
प्रति वंतादिपदज्ञानेकृतिवर्त्तमानत्वैकत्वानुभवत्वादिपादके नैत्यादिधानेकृतिसाध्यत्वेष्टसाधनत्वादिप्रतिपादके विध्यादिज्ञानेकर्मत्वे कृत्वादि वि
प्रतिपादके द्वितीयादिज्ञाने द्वित्वादिपरज्ञानियकज्ञातादिपदज्ञाने चायं नियमो व्यभिचारीतिवाच्यम् एतत्पदएकैकमात्रविषयकज्ञानस्यापिना
नार्थविषयकानुभवजनकत्वमनुभवसिद्धं तदतिरिक्तपदस्थल एव एतन्नियमाभ्युपगमात् तत्पद घटादिपदादिपदादि कर्मैवनचतथापि घटे
घपदइत्यादौ एकघटपदमात्रविषयकज्ञानेनैवनानाघटप्रत्यायनाव्यभिचार इतिवाच्यम् अत एवतत्स्वरूपैकशेषाभ्युपगमात्तथाचलुमबदं

चि.टी० त

इत्यतिसंधानादेवघटगततद्बोधःस्वरूपैकदेशंविनायथादिपदाद्विरचनादिज्ञोनानाघटविषयकबोधत्वसिद्धएवेतिप्राचीनमततनिगर्व्यः।नन्वेवंवक्तु
रेवैकस्यातात्पर्यविरहेपिवक्तृश्रोतुस्तद्धर्मत्तत्रयुगपदनेकार्थबोधाद्धाकाभेदोदुर्वारः।नवाश्रोतुर्वक्तृप्रयुक्तित्विहावश्यकत्वेपेनविशेषदर्शनात्तत्पाता
त्पर्यस्यात्किंचसकृदुच्चरितस्यसकृदर्थप्रत्यापकत्वेनन्वेकमात्रानुभवजनकत्वेपेनविशेषदर्शनान्नतथातात्पर्यस्यात्।किंचसकृदुच्चरितस्यसकृ
दर्थप्रत्यापकत्वनन्वेकमात्रानुभवजनकत्वंगौरवान्मानाभावाच्चतस्मात्तस्यमयीकमात्रमनिवंधनादेवाहत्तितद्विरहोयुगपत्तामयीसन्निपातंचयुग
पदनेकार्थान्वयबोधःनचवाक्यभेदस्तादृशस्यैवत्वादितिसकलतांत्रिकसंप्रदायमनुसंधानआह।निषेतुउक्तविशेषदर्शनेनविवर्क्षोपितु।तसेछापूर्वति
वेषकत्वेमानाभावादितिभावः।इदमुपलक्षणं।विशेषदर्शनस्यासार्वदिकत्वाच्चेत्यपिबोध्यं।तदावृत्तिरपिनस्यादितितद्वावृत्तिकल्पनापिनस्यादित्य

प

र्थः।तात्पर्येतितात्पर्यनिर्वाहार्थंतात्पर्यविषयान्वयबोधनिर्वाहार्थंआवृत्तिकल्पनादितितथाचआवृत्तिकल्पनादित्यर्थः।अन्यथातात्पर्यविषया
नुपपत्तिंविनाआवृत्तिकल्पनेएवंतरेपियद्यतोःस्तिपटोस्तीत्यादावपि।तदापत्तेतरावृत्तिकल्पनापत्तेः।इदमुपलक्षणं।अनेकार्थतात्पर्यसत्वेआ
वृत्त्यैवायेकपमन्वयबोधःआवृत्त्याबोधनीयेर्थवक्तुस्तात्पर्याभावात्।किंचवक्तृस्तादृशाभिप्रायभावेपिपत्रविशेषादर्शनात्श्रोतुरुभयपरत्वभ्र
मस्तत्रयुगपदुभयानुभवोदुर्वारइत्यपिद्रष्टव्यं।नन्वनेकार्थतात्पर्यसत्वेपियुगपन्नानेकार्थानुभवःएकैकमात्रविषयकशाब्दबुद्धित्वस्यशब्दजन्यता
वच्छेदकत्वादित्यतआहअतएवेतियतएवनतादृशकार्यकारणभावोऽतएवेत्यर्थः।तदुच्चारणेपशास्येति।एकस्येवलक्ष्यादिपदमुख्यवेतादिपदस्येत्यर्थः। राम०
उभयपरतायामितिकृतिवर्त्तमानत्वस्पर्शचंद्रोभपादिपरतायहेइत्यर्थः।उपसंहरति।तस्मादितिपद्मपादिनावृत्तिकल्पनाकथंतर्हितत्रान्वयबो

धरत्वत आहुस्तस्या दितिपदादित्वेन स्वार्थः। तुल्यवदिति पूर्वमपदिस्वार्थः। साम्यमास्तुल्यत्वादिति एकदा सर्वथा मेवानुभावकसामग्रीसत्वादित्यर्थः। अन्य
त्तिमात्रमुपेत्यापि दूषणमाह। प्रथममिति। एकसामग्र्याश्च परसामग्री प्रतिक्षेपे पि विनिगमनाविरहादिति भावः। पदानन्तरत्वं उदिपद पूर्वपदं तादिप
दातिरिक्तस्थले तादृशकार्यकारणभावद्वयं तच्च द्वयमिति। अपेति एकमात्रानुभवजनकतयोभयवादिसिद्धे उक्तपदोच्चारणे शतः सिद्धसाध
नवारणायविवादपदमिति विवादपदत्वं च हनेकार्यतात्पर्यकोच्चारितत्वादि ज्ञानसमवहितत्वे पदज्ञानस्यैवान्वयप्रतियोगिपदार्थान्तरविषयकानुभाव
नुकत्वाकत्तपावाधवारणाय उच्चारणमिति उच्चारणं ज्ञानं पक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्धेरुद्देश्यतावच्छेदकोच्चारणोत्तरत्वपर्याप्तत्वादेस
मर्हात्वत्वव्याघातपदद्वयानुसंधानेनैशतो वा धः। एकशक्तीति सर्वस्यैव पदज्ञानस्यान्वयप्रतियोगिपदार्थान्तरविषयकानुभवजनकत्वादस्मासिद्धिवार
णाय एकशक्तिविषयमितिपदे एकशक्तिविषयस्य केवलान्वयित्वात् दोषतादवस्थ्यं तथा एकशक्तिविषयत्वं स्वविषयाद्यत्पदनिष्ठशक्तिविषय
त्वं स्वपदं पक्षीभूतज्ञानपरं विषयत्वं च विशेष्यत्वं अन्यथा जातित्वसंसर्गयोरप्यनुभवजननादप्रसिद्ध्यापत्तेः। सिद्धसाधनवारणोपएकमेवेति स्वपदं प
क्षीभूतज्ञानस्य साधनेन च अन्वयप्रतियोगिपदार्थान्तरं जात्यादिकं चादाय प्रसिद्धिः तादृश्यादेकमितिनानार्थविषयकस्मृतिजननाद्वाधस्यादित्य
तो ऽनुभवत्वेनोपादानं जनकत्वं च फलोपधायकत्वं स्वरूपयोग्यत्वे साध्ये बाधापत्तेः। तेन स्वविषयाद्यपदनिरूपितशक्तिविशिष्टैकमात्रानुभवोप
धायकत्वं साध्यं पर्यवसितं तथा पसिताद्दृशैकमात्रानुभवोपधायकत्वेन तादृशैकभिन्नानुभावकत्वे सति तादृशैकानुभावकत्वं अन्वयप्रतियोगि
पदार्थान्तरं जात्यादिकं चादाय प्रसिद्धितादवस्थ्यात्तथापि तादृशशक्तिविशिष्टत्वपानानुभावकत्वे सति तादृशशक्तिविशेष्यानुभावकत्वं तच्च

वि॰टी॰ स्वविषयाख्यपदशक्तिविशेष्यं यद्यत्तत्स्वजन्यशाब्दबोधविषयत्वनिष्ठान्योन्याभावाप्रतियोगि स्वविषयाख्यपदशक्तिविशेष्यं स्वजन्यशाब्दबोध
विषयत्वसामान्यकत्वेन तु ताद्दशशक्तिविशेष्यत्वया विषयानुभावकत्वे सति ताद्दशशक्तिविशेष्यानुभाविकत्वं क्रमिकनानाविषयकानुभवजनकत्व
मादाय। पर्यायत्वापत्तेः अन्योन्याभावस्य प्रतियोग्यवृत्तिर्बोध्यः तेनाश्रयान्योन्याभावादिकमादाय न दोषः यदि च काशपदे काशपत्वादिना नाश
क्रियाद्यनंतरं नैकदा उभयप्रकारेणान्वयबोधस्तदा विशेष्यपदस्यानेकप्रकारपदं निवेश्य पर्यवसाध्यांतरं बोध्यं अत्रैव वाचस्पत्यपदेन तस्या निवेशः कार्य इ
ति। एकपदोच्चारणत्वादिति एकाख्यपदविषयकज्ञानत्वादित्यर्थः। अन्यथा साध्ये विशिष्याख्यपदोपादानाद्व्यभिचारोपपत्तेः साध्ये हेतौ च अख्यपदस्या २५
नेयत्तत्पदं निवेश्य पंसामान्यतो व्याप्तिरेव सेत्स्यतीति न परस्परदोषावारणाय स्पष्टं तत्त्वविशेषस्य अत्र हेतोर्नानापदोपपत्त्यादौ समूहालंबनाख्यपदद्वयानु
संधानेव्यभिचारवारणाय एकाख्यपदविशेषणं तैयत्तत्तावच्छेदकसामानाधिकरणेन साध्यसिद्धेरुद्देश्यत्वाच्च भागासिद्धिर्न दोषाय यद्यप्येका
ख्यपदविषयकेनाख्यपदद्वयविषयकत्वे सत्यख्यपदविषयकत्वान्नत्वं अत्र हेतोर्विभीतकं यदुपपत्त्यादौ विभीतकपदाख्यपदगोचरसमूहालंबने व्यभिचा
रात्तनाप्याख्यपदसमानसंख्यात्वावच्छेदकपदद्वयाविषयकत्वे सत्याख्यपदविषयकज्ञानत्वं यत्र क्रमिकाख्यपदविभीतकपदज्ञानाभ्यां क्रमिकविभिन्ना
ख्यपदज्ञानाभ्यां वा समूहालंबनोनार्थविषयकशाब्दबोधस्तत्राख्यपदज्ञाने व्यभिचारापत्तेः तथापि स्वस्वविषयाख्यपदनिष्ठान्योन्याभावप्रतियोगि
पदत्वपदसमानशाब्दतावच्छेदकपदत्वविषयकज्ञानविशिष्टत्वे सति अत्राख्यपदशक्तिविशेष्यनिष्ठसमभिव्याहृतपदांतरलक्षणाज्ञानाविशिष्टज्ञा राम॰
नत्वं च विवक्षितं चरमाविशिष्यांतोपादानाद्धेतोर्घटं पश्येत्यादौ घटपदस्याख्येलक्षणाज्ञाने ये पदाख्यपदगोचरसमूहालंबने व्यभिचारः अ

न्योन्याभावस्य प्रतियोग्यवृत्तिर्बोध्यः वैशिष्ट्यं च स्वाव्यवहितकालावच्छेदेनैकार्थवृत्तित्वं स्वाव्यवहितत्वं च स्वत्वज्ञाना एवं तत्र ज्ञानत्रपसाधारणं तेन पत्रा
नुभवस्थास्मरणादिप्रतिबंधवशेन भिन्नपदस्योपस्थापदस्मरणाद्वितीतकादिपदस्य त्वास्यकाद्यपदान्तरस्य त्वात्मिकावाऽद्यपदार्थस्मृतिः ततो विभी
तकादिपदार्थस्मृतिस्ततो मिलितानां शाब्दबोधोपधानं तत्राद्यपदज्ञानेन व्यभिचारः अभिन्नाद्यपदज्ञानविशिष्टत्वेनापि विशेषणीयं तेनैकस्यैवा
द्यपदस्य क्रमेण व्युत्पन्नानार्थविषयकः शाब्दबोधः तत्र न व्यभिचारः न च तथापि स्मृतेऽत्र ज्ञानीसीत्यादौ व्यभिचारः तत्रैकेनैवाद्यपदज्ञानेन ना
नार्थबोधादिति वाच्यं तत्रस्वरूपैकशेषाभ्युपगमेन तु नाद्यपदस्मरणपदेन नानार्थबोधात् स्वरूपैकशेषं विना नानार्थबोधस्यासिद्धः तच्च घटे द्वा
रणाद्युपस्थितानुबोधेन पक्षेऽन्त्यदृगंशमान्यतोवाभिरेवादवनापातयाचसर्वं चंद्राघुभय्यां यस्थापकयुष्यधंतादिपदज्ञानेकरोकत्वादिबोधकत्वमपादि
विभक्तिज्ञाने च व्यभिचार इति वाच्यं तत्तत्पदविषयकत्वे सतीत्यनेनापि ज्ञानविशेषणान्नपदद्वयघटो द्वारा व्यतिरेके स्यात् ततः अन्वयपरत्वं ज्ञ एकमा
त्रबोधकतयोभयवादिसिद्धमद्यपदज्ञानं तदा तद्विशेषणानुपादानेऽपि न क्षतिः न च तथापि कारणान्तरविलंबेन पत्रैक्यविलंबस्तत्र व्यभिचार इति
वाच्यं अद्यपदवाच्यनिष्ठतात्पर्यकाद्यादिज्ञानसमवहितत्वेनापि विशेषणाद्वितिभावात् घटपदोच्चारणवदिति एकपरघटपदज्ञानवदित्सर्था
नापघुघटपदज्ञानस्य पद्यसमत्वात् पक्षेति अत्राद्यपदमेव पक्षः साध्यं च नानार्थेति स्वरूपकथनं नानाशक्त्याऽनुभावकत्वमात्रं विवक्षितं त
त्रानानुभावकत्वमात्रस्य साध्यत्वे अनुभावकत्वेंऽशतो बाधव्यभिचारतो नानाशक्तेति स्वापनानाशक्तेत्यर्थः अन्यथा सर्वस्यैव पदस्यान्वय
प्रतियोगिपदार्थान्तरविषयकानुभवजनकत्वेन तद्दोषतादवस्थ्यात् शक्तिपदं शक्यतावच्छेदकपरं तेनेश्वरेच्छारूपायाः शक्तेरेकत्वेपि

चि०टी० नन्वतिः प्रकारत्वं तृतीयार्थतया चस्वीयनानोशक्यतावच्छेदकप्रकारकानुभवजनकत्वाभावः साध्यः पार्वतीत्यत्र हरिपदशक्यतावच्छेदकानिप्रातिस्विक
रूपेणोपादाय प्रत्येकं स्वशक्यतावच्छेदकीभूततत्तत्प्रकारकानुभवजनकत्वेपि तदितरस्वशक्यतावच्छेदकप्रकारकानुभवजनकत्वाभावकूटः साध्यः
समूहालंबनरूपानुमितितादृशविशिष्टाभावकूटत्वमेव वा साध्यतावच्छेदकमिति निष्कर्षः। तादृशानुभवजनकत्वं च ऽहरिणा हरिं पश्येदित्यादौ अत्र हरि
पदद्वयविषयकसमूहालंबनज्ञाने प्रसिद्धम् एकस्यैवात्र हरिपदस्यावृत्त्या। द्विनाकेमेनानेकार्थबोधकत्वात्तात्पर्यकरणतावादिनायपदस्याननुभावकत्वा
च्चाबाधव्यभिचारसिद्धसाधनापत्तिरित्यत उक्तमेकत्रोच्चारणादिति स्वमात्रविषयकज्ञानमादायेत्यर्थः। तादृशविशिष्टाभाववत्त्वमात्रविषयकज्ञानसामान्य
कमिति तु फलितार्थः सामान्यपदोपादानात्तु तादृशयत्किंचिदेकज्ञातमादाय नासतः सिद्धसाधनमर्थांतरं वा अत्र हरिणा हरिं पश्यतीत्यादौ समूहालंबना
हरिपदद्वयानुसंधानमादाय व्यभिचारवारणाय ननु मात्रपदविषयकेति स्वमात्रविषयकत्वं तु स्वशक्तिविशेष्यकस्व निष्ठान्योन्याभावप्रतियोगिपदद्व
जिज्ञासानाविशिष्टत्वं तेन हरिणा विभीतकं पश्येत्यादौ विभीतकपदाद्धरिपदगोचरसमूहालंबनमादाय न व्यभिचारः न चाऽहरिणा घटं पश्येत्यादौ घटपदस्या
त्रैलहरिणादृशापापघ्नपदाद्धरिगोचरसमूहालंबनमादाय व्यभिचारः। अन्मत्सर्वं पदं हेतुवत्तनानार्थत्वादिति पार्वतीत्यत्र हरिपदशक्यतावच्छेदकानि
प्रातिस्विकरूपेणोपादाय प्रत्येकं तदवच्छिन्नशक्तिकत्वेपि तिततदितरधर्मावच्छिन्नशक्तिकत्वं हेतुः समूहालंबनपरामर्शः पत्तभ्यां सामान्यतो व्याप्तिः
पुष्पवंतादिपदासत्वेन विशेषणान्न तत्र व्यभिचारः एवं यस्य यस्य पदस्य विवक्षितं ज्ञानमप्रसिद्धं तदन्यत्वेनापि विशेषणीयमिति भावः। अत एवेति एकदा राम०
एकस्मात्पदादनेकार्थबोधसामग्रीसत्वादित्यर्थः। प्रतिपाद्ययोः श्रोत्रोस्तथा च पुष्पवान्नानापुरुषस्य एकदा नानार्थानुभवः तथा एकस्यापि अन्यथा वा

घवात्तएकदाभानार्थानुभावकत्वव्युत्पत्त्यानानापुरुषस्यापिनस्यादितिभावः। आनयनस्य आनयनप्रतिपादकपदस्य उभयपरत्वेउभयव्यु
त्पिपरत्वेग्रहेपघपिक्रमिकान्वयबोधतात्पर्येसमुच्चयःयुगपदन्वयबोधेतात्पर्येद्वंद्वइतिवक्ष्यतेतत्रापिसंप्रदायमाश्रित्योक्तंनत्वास्तुएकद्वित्वविशिष्टे
कार्थप्रतिशेदनतात्पर्यद्वंद्वेःन्यत्रयुगपदन्वयबोधेसमुच्चयप्रत्युत्पाउः। नन्वेवंभिन्नवाक्यतावव्यवहारोनस्यादित्यतआह। वाक्येतिवाक्य
भेदव्यवहारस्त्वित्यर्थः। अर्थभेदादितिप्रतिपाद्यभेदात्ननुज्ञानभेदादितिभावः। मुख्यामुख्यपरेमुख्यार्थबोधसामग्रीशेघ्रेणावृत्तिनियमइतिद्रष्ट
पतिंगगायामितिप्रथमंचनमुख्यार्थान्वयबोधसामग्रीतात्पर्यादिधीविरहाद्वित्तिनस्मात्तरसहडुच्चरितेत्याद्व्युत्सर्गएववृत्तिद्वयापत्तिः। वृत्ति
द्वयज्ञानस्यशाब्दबोधोपधायकत्वापत्तिःइष्टत्वादितिमुख्यार्थानुभवसामग्रीलक्ष्यार्थानुभवसामग्र्याःसत्यतिपक्षवचनपरंपरेंवाध्यवाधवत्वेमाना
भावादितिभावः। ननुवृत्तिद्वयविरोधादेकदातात्पर्यमेवनास्तीत्यतआह। तात्पर्यानुरोधादितिवृत्तिकल्प्यतेइत्यर्थः। नन्वेवंषष्ठीःप्रवेशपेत्यादौमु
ख्यार्थान्वयानुपपत्तिविरहस्थलेलक्ष्यार्थशाब्दबुद्धिदशायांनियमतोमुख्यार्थशाब्दबोधापत्तिः। लक्षणायाःशक्यसंबंधात्मकत्वेनलक्षणापाल
क्ष्यार्थापस्थितिकालेशक्यशक्यान्वयोरवश्यमुपस्थितेरित्यतआह। तात्पर्यधीतितात्पर्यज्ञानसहकारादीत्यर्थः। वृत्तिरितिशाब्दबोधोपधा
यिकेतिशेषः। तथाचमुख्यार्थेतात्पर्यज्ञानविरहदशायामेवलक्षणार्थमात्रशाब्दबोधइतिभावः। ननुवृत्तिज्ञानार्थमेवतात्पर्यज्ञानस्यापेक्षित
त्वादन्यतःसिद्धेवृत्तिज्ञानतात्पर्यज्ञानसत्वमकिंचित्करमित्यतआह। नत्विति। वृत्त्यनुरोधात्वृत्तिमाहगौणलाक्षणिकयोरिति। वक्ष्यपदप—
प्रवेशयेत्यादौमुख्यार्थान्वयानुपपत्तिविरहस्थलेगौणलाक्षणिकार्थशाब्दबोधयोरित्यर्थः। मुख्यार्थानुभवसामग्रीसाहित्यात्वानुभवसामग्र्याःस

न

चि०टी० त्याति पक्तवत् परस्परविरोधित्वादिनत्तवेतिशेषः। उभयेत्यापत्तेरिति तात्पर्यज्ञानस्य शाब्दबोधाहेतुत्वपक्षे मुख्यार्थतात्पर्यासत्त्वेप्युभयानुभवसामग्रीस
त्वादिति भावः। ननु भवत्येव तत्र लाक्षणिकार्थशाब्दबोधः किंतु गंगायां घोष इत्यादौ यत्र मुख्यार्थान्वयानुपपत्तिस्तत्रैव लाक्षणिकार्थबोध इत्यत्र आ
ह। तात्पर्यानिर्वाहार्थमिति। मुख्यार्थबोधस्यत्वे तात्पर्यविषयसंबंधो। न्वयबोधार्थमपीत्यर्थः। वृत्तित्वेन शाब्दबोधकारणीभूतसंबंधेन तयोः गौणी
तदितरलक्षणयोः मुख्यलाक्षणिकयोरिति तथाचैतादृशस्थान एव युगपद्वृत्तिद्वयविरोध इतिभावेतेन तयोर्विरोधः प्रत्युक्तस्तु युगपत्तत्सामग्री
विरहनिबंधन इति भावः तयोः गौणीतदितरलक्षणयोः एकैकमात्रपरत्वेतु एकैकमात्रपरत्वग्रहेऽन्यवृत्तिद्वयविरोधः। वृत्तिज्ञानस्य शाब्दबोधजनक
ले ताभावः। परत्वेपरत्वग्रहेवृत्तिद्वयविरोधित्वस्य विरोधिवृत्तिस्य विरोधिवृत्तिद्वयज्ञानस्य दोषत्वे परस्परफलप्रतिबंधकत्वाभिधाने पारिभाषापत्ते
पा रितितदभिधानस्य स्वशास्त्रमात्रपरिभाषाप्रतिपत्तेरित्यर्थः। शीघ्रत्वेन प्रथमोपस्थितित्वेन तत्राववृत्तिरेवेति प्राथमिकपदज्ञानस्य तत्त्वादिति भावः
तात्पर्यग्रहक्रमादिति शाब्दसामग्र्यन्तरस्याप्युपलक्षणं। प्रथमोच्चरितस्य प्राथमिकपदज्ञानस्य पर्यवसितत्वादिति नष्टत्वादित्यर्थः। ननु पदिता
त्पर्याधीनं शाब्दप्रामाण्यं तदा मूर्खोच्चरितवेदकस्य प्रामाण्यं स्यादित्युपसंहारव्याजेन तात्पर्यनिरूपणस्य परमप्रयोजनमाह। संबंधेति इदं तात्प
र्यमितिवक्तुरिच्छागर्भं तात्पर्यमित्यर्थः। शाब्दबोधप्रयोजकमिति शेषः। तस्य वेदस्य पौरुषेयत्वमिति पुरुषप्रणीतत्वमित्यर्थः। तच्च पुरुषप्र
णीतत्वमित्यर्थः। तच्च पुरुषकंठादिजन्यत्वं पुरुषप्रयत्नजन्यत्वं वेति भावः। नन्वस्तु तात्पर्यानुरोधात् वेदस्य पुरुषप्रणीतत्वं तथापि नित्यतात्वा एभ०
दिमतप्रणीतत्वकृतः पदपदार्थाध्यापकपरंपराप्रतीतत्वेनैव तदुपपत्तिरित्यभिप्रायेणाशंकते अत्रेति मीमांसकाः ईश्वरस्य वेदकर्तृत्वानभ्युपगन्तृ

रु ब्र प्र

मीमांसकाद्युच्चारणपूर्वकत्वादिति सजातीयोच्चारणं वेदस्य करणपाठलाघवजन्यं वेदस्योच्चारणमित्यर्थः उच्चारणं च तदनुकूलकण्ठाद्यभिघातस्तद
नुकूलप्रयत्नो वा परतन्त्रमिति सजातीयोच्चारणानपेक्षं यत् तदन्यदित्यर्थः। अन्यथासाध्याविशेषापत्तेः अपं च मीमांसकस्य स्वमतेनेदं ध्येयं नैयायिक
मते ईश्वरीयवेदोच्चारणस्यैव सजातीयोच्चारणसापेक्षत्वाभावात्। वाक्यज्ञानं ततो वाक्यार्थज्ञानं ततो वाक्यार्थप्रतीति। इच्छा ततो वाक्यार्थप्रतीतिनिरू
पेष्टसाधनताज्ञानाद्यः वाकेइच्छा ततो वाक्यहेत्विष्टसाधनताज्ञानात् कण्ठाद्यभिघातादौ प्रयत्नस्ततः कण्ठाद्यभिघात इति क्रमे यदीश्वरीयकण्ठाद्यभिघा
तादेः तत्फलस्य च तज्जन्यवाक्यार्थज्ञानप्रयोज्यत्वाभावात्। न च परनयेपि वाक्यार्थस्मरणाधीनवेदोच्चारणस्य परकीयवेदोच्चारणस्य न तथात्वोक्तक्र
मेणासत्त्वात् वक्ष्यमाणसाक्षात्परंपरया सजातीयोच्चारणजन्यवाक्यार्थज्ञानाधीनत्वं इति तत्रापि परंपराप्रयोज्यत्वसंभवादिति भावः। तात्पर्यमपीति वेदगोचर
वक्तृतात्पर्यमात्रमपीत्यर्थः। तात्पर्यपूर्वकमिति सजातीयगोचरवक्तृतात्पर्यज्ञानसापेक्षमित्यर्थः। सापेक्षत्वं च पूर्ववत् जन्यवाक्यार्थज्ञानस्य साक्षात्पर
परया प्रयोज्यत्वं। परतन्त्रमिति सजातीयगोचरवक्तृतात्पर्यज्ञानानपेक्षं यत् तदन्यमित्यर्थः। कस्यापि वेदवक्तुः। प्रथममिति सजातीयगोचरवक्तृ
तात्पर्यज्ञाननिरपेक्षमित्यर्थः। ननु सर्गाद्यकालीनवेदवक्तृतात्पर्यं सजातीयगोचरवक्तृतात्पर्यज्ञानसापेक्षत्वमनुमेयमित्यत आह। अनादि
त्वादिति सर्गविच्छेदविरहादित्यर्थः। पूर्वपूर्वेति पूर्वपूर्वाध्यापकस्येत्यर्थः। उपजीव्येति वाक्यार्थज्ञानद्वारा उपजीव्येत्यर्थः। ननु स्वतन्त्रत्वादिघटक
उच्चारणमेव तत्परत्वे कथमध्यापकतात्पर्येण निर्वाह्यमित्यत आह। तदिच्छयेति उच्चारणमेवेत्येवकारेण स्वातन्त्र्यव्यवच्छेदः। लोकवेदसाधारणमिति
यावत्प्रमाप्रयोजकमिति शेषः। लाघवादिति भावः। स्वतन्त्रेति सजातीयगोचरवक्तृतात्पर्यज्ञाननिरपेक्षेत्यर्थः। पेक्षत्वेति जन्यसापेक्षेत्यर्थः। ननू

चिं॰टी॰ पापानावात् कथं परकीयं तात्पर्य्यमवधार्य्यं न्यायाद्युत्पत्तिमूलेत्प्रवर्त्तेत रस्यात्तदत्राह तदवधारणमिति मीमांसापाठ्यमनादित्वात्तत्सर्वं तदवधारणमपि न दुर्लभमि
तिभावः मीमांसालाघवादिज्ञानात्मकतर्कः। परिशोधितेति सहकृतेत्यर्थः। न्यायोऽनुमानं न त्वन्यावादेव शाब्दबोधोऽस्त्विति वाच्यं तात्पर्य्यग्रहस्य शाब्दबोध
मात्रे कारणत्वकल्पनात्पौरुषेयत्वानुमितिरित्यज्ञानादिमत्प्रणीतत्वमित्यर्थः पद्यपि तन्मते प्रसिद्धिः तथापि वेदवक्तृतात्पर्य्यस्यानमितत्वमित्यर्थः
अयथार्थज्ञाने विनेति शुकमूर्खादिधुच्चरितादित्यर्थः एतमितिवाक्येन तात्पर्य्यानुमानासंभवादिति भावः। अर्थधीरिति विशेषदर्शनोऽर्थधीरित्यर्थः। तदिच्छा।
ज. यावाकार्थज्ञाने छयापपपि वाक्यार्थतात्पर्य्यस्य बोधाधीनेतस्याप्रत्वर्द्ध्वाद्देदस्यानुवादकत्तापत्तेः तथापि एकपदार्थेऽपरपदार्थसंसर्गज्ञानेच्छेत्यर्थः।
ननु पुरुषान्तरस्य तद्वाक्यार्थप्रतीतीच्छावर्त्तत एव तद्दिष्ठ्यैवोच्चरितो वेदः स्यात्तत्राह प्रतिपुरुषमिति उच्चारणोद्देश्यात् वाक्यभेदात्तथा च तात्तत्र्य्यर्थज्ञा
नेविनोच्चरितात्तज्जातीयत्वादिति साजात्यमानुपूर्व्यादिवच्छिन्नं वेदे तथा च तद्वेदेऽप्यपीश्वरतात्पर्य्यमात्रेनिपामकं न तु तज्ज्ञोच्चारयितृतात्पर्य्यमपित
द्वेश्वरीयमेव सुलभमिति बोध्यं अन्यथाऽऽच्चारयितृतात्पर्य्यस्य प्रयोजकत्वेयद्भमानवेदादिति शुकमूर्खादिपक्षसमानादित्यर्थः। न त्वनेपापिकस्यनन्त्वमम
मते ईश्वरीयवाक्यार्थप्रतीतीच्छामादायोपपत्तिरित्यत आह ईश्वरेति प्रतिपुरुषं वाक्यभेदादिति भावः उच्चारणस्यस्वातन्त्र्येऽसिद्धेऽर्थसिद्धमेव तात्पर्य्य
स्यापि स्वातन्त्र्येऽस्वतन्त्रोच्चारणमक्तिस्यत्त्वभ तवाक्यार्थप्रतीतीच्छाव्यक्तेरेवस्वतन्त्रत्वादित्यभिप्रेत्य उच्चारणस्यस्वातन्त्र्यमेव साधयितुं शंकते। अथेति
अननुगतपदतावच्छेदकाभावे संदिग्धानैकान्तिकत्वं स्यादिति तत्पद्यतिको चेदः किं वेदत्वं पुनर्येति पुराणादिनिरासाय प्रयोगोच्छित्तिः तथा च मुख्यापावेद राम॰
पद व्युत्तित्तदाश्रयइत्यर्थः। वेदपदशक्यत्वमिति तु फलितार्थः शक्यतावच्छेदकज्ञानं विना शक्तिज्ञानं न संभवतीत्यभिप्रायेणाह मुख्यार्थेति: अनुगत

शक्यतावच्छेदकज्ञानाभावादित्यर्थः। नापीति सर्वत्र वेद इत्यनुषज्यते। तस्येति वेदैकदेशेत्यर्थः। अनुपानुभवोपधायकत्वे वाक्यत्वमित्यभिप्रायेण समुदा
यस्येति अप्रतिपादकत्वेन अन्वयानुभवानुपधायकत्वेन। असिद्धेरिति अनुपधायकव्यक्तौ भागासिद्धेरित्यर्थः। पदव्यासज्यवृत्त्यधिकरणताकाभावम
भ्युपेत्येदं तथाच स्वरूपासिद्धिरित्येवार्थः। स्वर्गकामादीति। प्रभृततदुपजीविप्रमाणातिरिक्तप्रमाणाजन्यमित्यविषयार्थकवाक्यमित्यर्थः। संदिग्धेति संदिग्ध
पौरुषेयत्वकेत्यर्थः। निश्चयात् अन्यतरकोटिनिश्चयात्। बाधानुमानयोरिति पौरुषेयत्वापौरुषेयत्वसाध्यकबाधानुमानयोरित्यर्थः। तुल्यत्वेनेति अप्रा
माण्यसंशयादिनेति शेषः। मध्यस्थस्य संशयपदेति तज्जन्यकोटिद्वयस्य स्मृत्या मध्यस्थस्य मानसः संशय इत्यर्थः। अनुमानाभ्यामिति कोटिद्वयस्य स्मृत्या इति
शेषः संशयप्रश्नानंतरमिति प्रश्नोत्तरपसंशयानंतरमित्यर्थः। पदतावच्छेदकज्ञानेविनानुमानासंभवादिति भावः। इदमुपलक्षणं भारतादावपि कदाचि
त्तादृशसंशयसंभवेनांशतः सिद्धसाधनापत्तिरित्यपि बोध्यं। विवादेति मीमांसकानामपौरुषेयत्वविप्रतिपत्तिविशेष्यत्वमित्यर्थः। अनुगतधर्मवि
नेति अनुगतधर्मविशेष्यतावच्छेदकं विनेत्यर्थः। विवादस्येति अपौरुषेयत्वप्रतिपत्तिविशेष्यत्वस्यापीत्यर्थः। अभावात् अनुगतत्वाभावात् तत्तद्व्य
क्तित्वस्य विशेष्यतावच्छेदकत्वे विशेष्यतावच्छेदकभेदेन विशेष्यताभेदादिति भावः। ननु तादृशप्रतिपत्तिविशेष्यतात्वेनानुगम इत्यत आह। भारतेति
देवदत्तीयत्वाद्येति: इदमापाततः तादृशजातौ नाकाम्यतावच्छेदकतया नानात्वेपि स्मृतिविरहात्। वस्तुतस्तु वेदत्वजातिः प्रत्येकवर्णपरिसमाप्ता व्या
सज्यवृत्तिर्वा आद्ये प्रत्येकवर्णग्रहेपि तत्प्रत्यक्षतापत्तेः नच पूर्वपूर्ववर्णानुभवजन्यसंस्कारसहकृतेन्द्रियवेद्या चरमवर्णवृत्तिरिति वाच्यं। चरमवर्णा
तिरिक्तसकलवर्णाग्रहेपि तद्ग्रहात् ककारत्वादिना संकरस्यादुर्वारत्वाच्च। नच ककारत्वखत्वादिव्याप्यनानेति वाच्यं। अनुगतत्वानुपपत्तेः न द्वितीयजाते

रतत्मात्वादित्येवतत्वेसाध्येविकल्पयति।किंचेति।तदर्थेति।वेदार्थेत्यर्थः।तदर्थधीजन्मत्वस्यप्रकोच्चरितेःभावादाह।उच्चारणेति।वेदानुपूर्वीत्यर्थः।सा
दित्वमिति।तथाचसाध्युच्चारणजन्यत्वंसाध्यमित्यर्थः।सादित्वंचप्रागभावप्रतियोगित्वं।उच्चारणंकंठताल्वभिघातः।प्रत्युच्चारणमिति।उच्चारणमात्रस्येवेत्य
र्थः।तथाचसिद्धसाधनमितिभावः।स्वतंत्रेति।सजातीयोच्चारणानपेक्षवक्तृप्रयत्नजनितत्वमित्यर्थः।अतोनापीत्यादिनाग्रोतनेनापौनरुक्त्यंपद्य
मानेति।तथाचाश्रुतेवाधव्यभिचारादितिभावः।तज्जातीयइति।तथाचस्वतंत्रपुरुषप्रणीतजातीयत्वंसाध्यमितिभावः।तज्जातीयत्वोक्त्याप्रत्यक्षमा
नभावस्यस्वतंत्रप्रणीतजातीयत्वेवदतामतस्वतंत्रपुरुषप्रणीतत्वंभवतीत्युक्तंभवति।तद्धीति।तथाचप्रमानमारनेमासेस्येतिव्यवहारोनस्या
त्तीपत्तव्यवहारंप्रतिसजातीयोच्चारणानपेक्षतदीयप्रयत्नजन्यत्वस्यनियामकत्वात्।अथसाक्षात्परंपरयातदीयप्रयत्नप्रयोज्यत्वमेवतदीय
त्वव्यवहारनियामकंतदानममेतिव्यवहारःकथंस्यादित्यर्थः।साजात्यंतत्व्यक्तित्वेनविवक्षितंशब्दत्वेनवेतिविकल्पदूषणात्तरमाह।स्वातंत्र्य
चेति।स्वातंत्र्यघटकसाजात्यनिरूपकत्वंचेत्यर्थः।उच्चारणव्यक्तावितितत्तद्व्यक्तित्वेनेत्यर्थः।समाप्तीति।समाप्तिवेदानुकूलप्रयत्नःसजातीयोच्चा
रणानपेक्षइत्यर्थः।तथाचास्मदादिप्रयत्नमादायसिद्धसाधनमितिभावः।उच्चारणसामान्यइतिशब्दत्वेनेत्यर्थः।नव्यासस्यापीति।नव्यासस्यापि
वतानुकूलप्रयत्नसजातीयोच्चारणानपेक्षः।वेदोच्चारणसापेक्षत्वादित्यर्थः।तथाचव्यभिचारइतिभावः।ननुसाजात्यमानुपूर्व्याविवक्षितमित्यार
चेनाह।किंचेति।स्मृतौचेतिआद्यस्मृतौचेत्यर्थः।नहितज्जातीयमितितत्स्वर्गमितिशेषः।तथाचतज्जातीयत्वस्यभेदघटितत्वात्।उक्तप्रत्ययस्यचाती राम॰
तार्थकत्वाद्व्यभिचारः।अन्यथास्वतंत्रपुरुषव्यासाधुक्तेआद्येतदुत्तरकालीनव्यासोक्तसाजात्यसत्वाद्व्यभिचारप्रसक्तेः।नान्याआकारानुपूर्वीकवाक्य

व्यासेन हि निर्णीतमित्यत्र प्रमाणमस्तीति भावः। ननु वेदजातीयपक्षः। स्वतंत्रपुरुषप्रणीतत्वसाध्यं पक्षतावच्छेदकसामानाधिकरण्येन चसा
ध्यसिद्धिरुद्देश्या। अतः पठ्यमाने वेदे नांशतो बाध इत्याशंकते अथेति। स्वतंत्रकर्तृकत्वस्य जातीयमिति वेदजातीयमित्यर्थः। इति साध्यमिति इति पक्षता
वच्छेदकसामानाधिकरण्येनानुमेयमित्यर्थः। ननु सर्गाद्यकालीनो वेदः पक्षः। इदानींतनो वा। आद्ये आश्रयासिद्धिः चरमे बाध इत्यत उक्तमनिष्ठे इ
विशेषमिति अविषयीकृतपक्षनिष्ठविशेषमित्यर्थः। वेदत्वेनैव पक्षत्वादिति भावः। अत्र च साधनक्रियाविशेषणत्वादिति यावत्। पठ्यमाने पि अंश
तो वाधाभावे पि व्यभिचार इति भावः। अथेति मुखप्रतीत्येति स्वरूपकथनं तदर्थपरतयेति स्वार्थप्रतीतीच्छयेत्यर्थः। तस्येति स्वार्थप्रतीतीच्छारूपस्य
तत्परत्वस्येत्यर्थः। अत एवेति उच्चरितत्वमुपेक्ष्य प्रतिसंधीयमानत्वोपादानादेवेत्यर्थः। ननु सजातीयोच्चारणानपेक्षत्वेन स्वरूपेण स्वातंत्र्ये
ण प्रतीतीच्छाविशेषणं पेयात् अत आह। अन्यथेति। स्वातंत्र्यविशेषणप्रक्षेपे इत्यर्थः। पठ्यमानवेदेति इदं च पक्षैकदेशे व्यभिचारस्या
पि संदिग्धानैकांतिकत्वापादोपलक्षणं। अत एवासिद्धसाधनाव्यभिचाराभ्यामेवेवाकेति। योग्यवाक्यार्थः। तेन साध्यस्य याथार्थ्यघटितत्वेऽप्ययोग्यवाक्यव्य
त्तिधर्मेणाव्यभिचारश्चिह्नाय प्रियोजननेच्छयातथाविधेति अर्थज्ञानवतेत्यर्थः। उक्तरूपस्वातंत्र्येणेच्छाविशेषणेनु पठ्यमानवेदादिष्वतित्वदेश्य
क्तित्वादौ व्यभिचार इति भावः। एतेनेति पठ्यमानवेदभारतयोर्व्यभिचारेणेत्यर्थः। वक्तृत्वात् वक्तृत्वयोरिति सजातीयध्वंसाव्याप्योच्चारणकर्तृत्वं वक्तृत्व
तद्व्याप्योच्चारणकर्तृत्वमनुवक्तृत्वमिति भावः। भेदस्य लोकसिद्धत्वादिति तथा च नाव्यापकेन सिद्धसाधनं तस्य वक्तृत्वाभावादिति भावः। सजातीयेति।
सजातीयपपरस्य उच्चारणज्ञानं तदनपेक्षत्वं तद्प्रयोज्यपदोच्चारणं केदाघमिघाते नु नत्त्वमित्यर्थः। एवं तादृशप्रयत्नजन्यत्वं साध्यमिह च तादृशाकेद

व्यासेन द्विर्नोक्तमित्यत्र प्रमाणमस्तीति भावः। ननु वेदजातीयपक्षः। स्वतंत्रपुरुषप्रणीतत्वसाध्यं पक्षतावच्छेदकसामानाधिकरण्येन च सा
ध्यसिद्धिरुद्देश्या। अतः पवमानवेदेनांशतो बाध इत्याशंकतेऽस्येति। स्वतंत्रकृतस्य जातीयमिति वेदजातीयमित्यर्थः। इतिसाध्यमिति इतिपक्षता
वच्छेदकसामानाधिकरण्येनानुमेयमित्यर्थः। ननु स्वर्गाद्यकालीनो वेदः पक्षः इदानींतनो वा आद्ये आश्रयासिद्धिः चरमे बाध इत्यत उक्तमनिर्द्धारि
विशेषणमिति। अविवक्षीकृतपक्षनिष्ठविशेषणमित्यर्थः। वेदत्वेनैव पक्षत्वादिति भावः। अत्र च साधनक्रियाविशेषणत्वाद्वितीया। पवमानेऽपि अंश
तो बाधाभावेऽपि व्यभिचार इति भावः। अथेतिमुखप्रतीत्येति स्वरूपकथनं तदर्थपरतयेति स्वार्थप्रतीतीच्छयेत्यर्थः। तस्येति स्वार्थप्रतीतीच्छारूपस्य
तत्परत्वस्येत्यर्थः। अत एवेति उक्तरीत्यैवमुपेक्ष्य प्रतिसंधीयमानत्वोपादानादेवेत्यर्थः। ननु सजातीयोच्चारणानपेक्षत्वे न स्वरूपेण स्वातंत्र्ये
ण। प्रतीतीच्छाविशेषणमपेक्ष्यात आह। अन्यथेति। स्वातंत्र्यविशेषणाप्रक्षेपे इत्यर्थः। पवमानवेदेति इदं च पक्षे समेऽपि व्यभिचारस्या
पि संदिग्धानैकांतिकतया दोषत्वं न पे। अत एव सिद्धसाधनाव्यभिचाराभ्यामेव वाकेति। योग्यवाक्यार्थः। तेन साध्यस्य यथार्थत्वघटितेऽप्ययोग्यवाक्यव्य
ति धर्मेण व्यभिचार चिरकालापि पिष्ययांजनने छपातयाविधेति अर्थज्ञानवतेत्यर्थः। उक्तरूपस्वातंत्र्येणेच्छाविशेषणेनु पवमानवेदादिव्यतिदेव्य
क्तित्वादौ व्यभिचार इति भावः। एतेनेति पवमानवेदभारतयोर्व्यभिचारेणेत्यर्थः। वक्तृत्वानुवक्तृत्वयोरिति सजातीयध्वंसाव्याप्योच्चारणकर्तृत्वं वक्तृत्व
तद्व्याप्योच्चारणकर्तृत्वमनुवक्तृत्वमिति भावः। मेरस्यलोकसिद्धत्वादिति तथा च नाव्यापकेन सिद्धसाधनं तस्य वक्तृत्वाभावादिति भावः। सजातीयेति।
सजातीययस्य यदुच्चारणज्ञानं तदनपेक्षं तत्प्रयोज्यपदुच्चारणकं घमिघाते तु नन्यत्वमित्यर्थः। एवं तादृशाश्रयतज्जन्यत्वं साध्यमिह च तादृशाकेण

घमिघातजन्यत्वमितिभेदान्न्तत्पर्येनहृत्कसाजात्यमानुपूर्व्यविवृत्तितंप्रयोज्यत्वेवत्वजन्यवाक्यार्थज्ञानंतदिष्टादिद्वाराप्रवर्तकत्वंमेरावोध्यंपञ्चमा
नवेदइतिपक्षतावच्छेदकसामानाधिकरण्येनसाध्यसिद्धेःदेशपत्वेचपञ्चास्मदादीनांवेदसमानानुपूर्वीकंवाक्यंकुरणापादवादिनादेववसंपन्नेतत्रा
शात:सिद्धसाधनमितिभाव:। किंवेदत्वमितिपक्षतावच्छेदकप्रश्नेसमाधत्तेशब्देतिशब्दातिरिक्तप्रत्यक्षोपजीविप्रमाणातिरिक्तपरप्रमाणानजन्य
प्रमितिविषयार्थकोपरतद्न्यत्वेसतिशब्दजन्यवाक्यार्थज्ञानेनान्न्योपप:प्रमाणाशब्दत्त्वमित्यर्थ:। तथाचेदमेवपक्षतावच्छेदकमितिभाव:। अत्र
व्यासादिवाक्यादिप्रत्यक्षजन्यैःहृष्टार्थकभानतादोरहृष्टार्थकार्थदोवातिव्याप्तिवारणायप्रत्यक्षेत्यत्वतंइत्यचततुभयातिरिक्तंप्रमाणोचकृतादित्तज्जन्यप्र
मितिविषयार्थकत्वात्। तयोर्नातिव्याप्ति:नचहृष्टार्थवेस्तत्कस्यापिलक्षेतैमाकथंतत्रातिव्याप्तिरितिवाच्यंपरैस्तस्यवेदत्वानभ्युपगमेननस्याल ॥
क्षत्वात्अन्यथातत्रसत्त्वेतत्प्रतीकप्रभावेनाव्याप्त्यापत्ते:तस्यवेदत्वाभावेपिपुराणवेदव्याख्यानादिविनाध्ययननिषेधोवाचनिकएवघटादीनांपनुगे
हेघटोस्तीत्यादिप्रत्यक्षजन्येगेहेघटोस्तीत्यादिलौकिकवाक्येऽतिव्याप्तिवारणायप्रत्यक्षेतिनितत्रवक्ष्यमाणयुक्त्याअदृष्टजनकाध्ययनविषयत्वे
सतीत्यनेनापिविशेषणीयतपातत्रातिव्याप्तिविरहात्। प्रमितिविषयकार्थकमात्रोक्ताषसंभवइतिजन्यांतप्रमितिविशेषणंशब्दोपजीव्यतिरिक्त
नुमानस्यप्रमाणविशेषणत्वेप्यसंभव:शब्दोपजीव्यतिरिक्तेनप्रमाणेननवेदाद्यात्मकशब्देनवेदार्थस्यप्रमप्रमापणादत:शब्दातिरिक्तत्वंचापिप्रमा
णविशेषणंशब्दपदंचशब्दज्ञानपरंअन्यथाशब्दतदुपजीव्यतिरिक्तप्रमाणेनवेदाद्यात्मकशब्दज्ञानेनवेदार्थस्यप्रमापणादसंभवतादवस्थ्या राम॰
त्। शब्दस्यचाप्रमाणत्वान्नतमादायासंभव:शब्दज्ञानातिरिक्तत्वमात्रोक्तावप्यसंभव:शब्दज्ञानातिरिक्तप्रमाणेनानुमानेनवेदार्थस्यप्रमाप

रागादेतदप्रमाणातिरिक्तत्वमुपात्तेइदं चानुमानेनसाध्यादिप्रसिद्ध्यर्थंवेदस्यापेक्षणाद्यासंभवः। नन्वत्रशब्दोपजीवित्वेनशब्दजन्यत्वंव्याप्तिज्ञानादेवंप्र
तथात्वेनासंभवापत्तेनापितन्मूलकत्वंतथापिचक्षुरादेर्दीपदानादिप्रवृत्त्यादिमूलकादृष्टद्वाराविधिवाक्यमूलकत्वापात्तज्जन्योपनीतभानमादायासं
भवाभावेपिश्रवणोद्दिष्टजन्योपनीतभानविषयार्थकत्वादव्याप्यापत्तेः। श्रवणस्यनित्यतया(दृष्टद्वाराविशेषाद्धा)मूलकत्वात्। आत्ममनःप्रभृतिनित्यप्र
माणाजन्यानुमित्यादिविषयार्थकतयासंभवापत्तेः। अथद्वितीयप्रमाणपदमसाधारणपरंतेनात्ममनःप्रभृतिप्रमाणमादायनासंभवः। प्रमितीवि
षयात्मकेत्यत्रप्रमितिश्चतदुभयवादिसिद्धत्वेनस्वजन्यज्ञानसमानाकारत्वेनचविशेषणीयास्त्वपदमन्यत्वप्रतियोगिवाक्यपरंतेनश्रवणजन्योपनीतभा
नमादायनाव्याप्तिः नवाश्रात्माइच्छावानात्मत्वादित्याद्यनुमितिविषयपरंकिंचिदर्थकेस्वर्गकामोयजेतेत्यादिवेदेऽव्याप्तिःनवा। विधेयंपंचमेयवदभिधे
यत्वादित्यादिसामान्यप्रत्यासत्तिजन्यज्ञानमूलकानुमितिविषयार्थकत्वादसंभवः नचतत्पासत्यदृष्टस्यकार्यमात्रहेतुतयाचक्षुरादेर्जन्यप्रमाणमात्रस्य
वादृष्टद्वाराविधिवाक्यमूलकत्वेनशब्दमूलकप्रमाणातिरिक्तासाधारणप्रमाणाश्रवणादेयपार्थकेदृष्टार्थकप्रमाणतादतिव्याप्यापत्तेरितिवाच्यं। दृष्टद्वा
रकशब्दमूलकत्वस्यविवक्षितत्वेनचक्षुरादेरपितादृशप्रमाणातिरिक्तासाधारणप्रमाणतपातज्जन्यप्रमितिविषयार्थकत्वेनतत्रातिव्याप्तिविरहात्। दृ
ष्टद्वारकशब्दमूलप्रमाणंचविशेषणज्ञानादिविधयाशब्दजन्यपदार्थोपस्थितिर्वाकार्थानुभवप्रयोज्यानुमावप्रयोज्यानुमानव्याप्तिस्वप्रसिद्ध। नचैवंभेर्या
दिकशब्दजनकमित्यादिदृष्टार्थकभारतादौतादृशवेदेचातिव्याप्तिःशब्दज्ञानातिरिक्ततादृशशब्दमूलकप्रमाणातिरिक्तासाधारणप्रमाणाजन्यस्वजन्यज्ञानस
मानाकारतदर्थविषयकोभयवादिसिद्धप्रमितेरप्रसिद्धेःशब्दस्यचक्षुराद्ययोग्यत्वात्भेर्यादेःश्रवणायोग्यत्वात्। मनःप्रभृतेश्चासाधारणत्वात्। अनुमानादे

वि॰टी॰ स्य विशेषणतान्न विधया शब्दज्ञानजन्यप्रमितिविषयार्थकत्वादेव न तज्जातिव्याप्तिरिति चेन्न तादृशप्रमाणातिरिक्तो सा धारणप्रमाणे न वेदनिष्ठाकांक्षादिज्ञा
नेवेदार्थस्य शाब्दबोधजननादसंभवापत्तेः आकांक्षादिज्ञानस्य आकांक्षादिलिंगकानुमितिकरणत्वेन विनश्यदवस्थत्वया धारावाहिकद्वितीयशाब्दबोध
करणत्वेन वास्य धारणप्रमाणत्वात् । शाब्दबोधान्यत्वेन प्रमितिविशेषणे शब्दज्ञानातिरिक्ते तस्य सर्वैर्यथार्थ्यप्रसंगात् । अथ यज्ज्ञानं स्वजन्यज्ञानसमा
नाकारज्ञानसामान्यं साक्षात्परंपरया तिपरंपरया वा ऽदृष्टद्वारा शब्दज्ञानजन्यज्ञानप्रयोज्यतत्त्वं स्वजन्यज्ञानसमानाकारत्वं च स्वजन्यज्ञानेयत्र यत्र
येन येन रूपेण पथधिविषयीकरोति तत्र तत्र तेन २ तेन रूपेण तत्तद्वगाहित्वं शब्दोपजीविप्रमाणत्वं स्वपदमन्यत्वप्रतियोगिवाक्यपरं इत्थं च मनसो पि वेद
स्यत्वेन तदतिरिक्तप्रमाणत्वं मनसा वेदार्थगोचरानुभवजनने ऽव्यवस्थं साक्षात्परंपरया वा वेदज्ञानजन्यवेदार्थज्ञानापेक्षणात् एवं वेदनिष्ठाकांक्षादिज्ञान
मपि न तदतिरिक्तप्रमाणं तेनापि वेदार्थगोचरशाब्दबोधजनने ऽव्यवस्थं शब्दज्ञानजन्यपदार्थोपस्थितेरपेक्षणात् । एवं क्रमेण त्वमनःसंयोगः शरीरादेरपि वे
दस्थत्वेन तदतिरिक्तप्रमाणत्वे लौकिकवाक्यदृष्टार्थकभारतादिस्थत्वे लौकिकवाक्यभारतादिवाक्यज्ञानेतज्जन्यपदार्थोपस्थितिवाक्यार्थानुभवमल
कौत्वमानव्यक्तिस्थतादृशप्रमाणत्वप्रसिद्धं चक्षुरादिनापि कदाचित् दृष्टार्थकभारतादिजन्यज्ञानसमानाकारज्ञानजनने विशेषणाज्ञानविधया ज्ञानलक्ष
णप्रत्यासत्तिविधया वा तादृशभारतादिज्ञानजन्यज्ञानापेक्षणात् तादृशभारतादेरेतिव्याप्तिरतः सामान्यपदोपादानं च चक्षुरादिजन्यज्ञानसामान्य
स्य शब्दज्ञानजन्यज्ञानप्रयोज्यत्वाभावात् चक्षुरादेरपि तदतिरिक्तप्रमाणात्तथा चक्षुरादिजन्योपनीतभानसामान्यप्रत्यासत्तिजन्यज्ञानविषयत्वस्य राम॰
च वेदार्थे सत्त्वादसंभव इति स्वजन्यज्ञानसमानाकारेति ज्ञानविशेषणं इत्थं च चक्षुरादिना आत्मादिना वा वेदसमानाकारज्ञानजनने ऽव्यवस्थं साक्षात्परं

परपावेदस्तासजन्यवेदार्थज्ञानापेक्षणाद्वेदस्यत्वे तेषामपि तदतिरिक्ताभावात्तासंभवः न च तथापि सर्वज्ञान्यथानुपपत्त्यायोगजधर्मस्यापि निर्विकल्पक
जनकतपापोगज वेदार्थगोचरज्ञानोत्पादकोपनयनसहकारेण चक्षुरादिजन्यवेदसमानाकारज्ञानस्य सामान्यान्तर्गतस्य शब्दज्ञानजन्यज्ञानप्रयोज्यत्वाभावे
न वेदस्यत्वेवक्तुपदेनेनिरुक्तशब्दोपजीविप्रमाणात्वमितिवाच्यं उभयवापिसिद्धज्ञानाप्रयोज्यत्वेनतास्यज्ञानसामान्यस्य विशेषणीयत्वात् । शाब्दानु
भवजनितत्स्मृतिपरम्पराधीनानुमितिविषयत्वस्यावेदार्थेष्वासंभवस्यतः परंपरयातिपरंपरयावेतिश्च दृष्टस्य कार्य्यमात्रहेतुत्वेन चक्षुरादिनागेहेघटोस्ती
त्यादिलौकिकवाक्यार्थविषयकज्ञानजननेपिनियमतोदृष्टद्वाराविधिजन्यज्ञानापेक्षणात्तादृशमर्मणातिरिक्तप्रमाणाजन्यप्रमितिविषयार्थकत्वा
प्रसिद्ध्याऽसंभवइत्यतोदृष्टद्वारेतिशब्दज्ञानप्रयोज्यत्वमात्रोक्तौ प्रेर्य्यादिकं शब्दजनकमित्यादिशब्दघटितदृष्टार्थकभारतादौतादृशवेदेऽतिव्याप्तिः प्रमा
णमात्रेचतदर्थगोचरज्ञानजननेऽवश्यंशब्दज्ञानापेक्षणादतः शब्दज्ञानजन्यज्ञानेतिनचैवमपितदतिव्याप्तिस्तद्वस्याप्रमाणमात्रेणैतदर्थगोच
रज्ञानजननेशब्दज्ञानजन्यस्यशब्दशब्दत्वविशिष्टज्ञानस्यनियमतोऽपेक्षणादितिवाच्यं तत्राशब्दजन्यज्ञानस्यविवक्षितत्वात्तन्नचैवंशब्दातिरिक्तत्ववि
शेषणवैयर्थ्यंवेदाद्यात्मकशब्देनवेदार्थगोचरानुभवजनने तद्विषयशब्दज्ञानजन्यज्ञानस्यपदार्थोपस्थितेरपेक्षणाच्छब्दोपजीविप्रमाणातिरिक्तत्व
थी प विशेषणेनैवतद्दूष्यापिवारणात्शब्दज्ञानजन्यवाक्यार्थानुभवप्रयोज्यमित्युक्तौचवेदगतपदजन्यपदार्थस्मृतिजन्यानुमानेनवेदार्थस्यप्रमापलाप
संभवापत्तेरितिवाच्यं । पदजन्यपदेनशब्दज्ञानजन्यज्ञानद्वारापदजन्यत्वस्यविवक्षितत्वात् । वेदार्थगोचरशाब्दबोधस्वशब्दजन्यज्ञानाद्वारवेदाद्यात्म
कशब्दजन्यइतितद्रहितभावः अखण्डभेदप्रतियोगिघटकतयाजन्यताविशेषस्यसंसर्गत्वपरिचायकमात्रतयावाऽतिव्याप्त्याद्यवारकत्वेपिनशब्दज्ञा

चि॰टी॰ नञ्जन्यज्ञानत्वावेद्यस्यैव पर्यन्तोपादेयमेवं वा शाब्दातिरिक्तत्वं विशेषणं मले चशब्दोपजी। वीतत्र द्वितीयशब्दपदस्य ज्ञानपरतया शाब्दज्ञानोपजी
वीति समुदायार्थत्वात्। न चात्मा शाब्दजन्यज्ञानत्वानित्यादि शब्दे शाब्दबोधघटितदृष्टार्थकभारतादौ तादृशवेदे चातिव्याप्तिः प्रमाणमात्रगोचरतदर्थगो
चरज्ञानजनने वर्षपरशाब्दज्ञानजन्यवाक्यार्थज्ञानस्यसाज्ञातपरंपरयापेक्षणात्। ज्ञानशानेसाज्ञातपरंपरया विषयतयाज्ञानस्य प्रयोजकत्वाच्चेति
वाच्यं तत्र प्रमाणान्तरजन्यज्ञाने शब्दजन्यत्वं भ्रमप्रमा पैवसामान्यलक्षणाप्रत्यासत्त्या शाब्दजन्यज्ञानस्य ज्ञाने तत्तज्ज्ञानसहकारेणानुमानादात्मा
निष्ठशाब्दजन्यज्ञानत्वग्रहस्तत्रैव तदनुमानजन्यतदर्थविषयकज्ञानस्य शाब्दज्ञानजन्यज्ञानप्रयोज्यत्वाभावात् तज्जन्यप्रमितिविषयकार्थकत्वे
नातिव्याप्तिविरहात् द्वितीयप्रमाणपदे च स्वरूपकथने प्रमितिविषयार्थके तत्र प्रमितिपदं स्वजन्यज्ञानसमानाकारकानुमात्रभवपरं तादृशज्ञानमा
त्रपरं वा प्रमात्वपर्यन्तप्रवेशे प्रयोजनविरहात्। स्वजन्यज्ञानसमानाकारेति विशेषणात्। प्रमेयत्वाभिधेयत्वादिसामान्यलक्षणाप्रत्यासत्तिजज्ञानाधी
नेन प्रमेयमभिधेयवदित्यनुमित्यात्मकज्ञानेन सर्वस्यैव वेदार्थस्य विषयीकरणेऽपि नासंभव इति चेन्न आत्मा शाब्दवानित्यादिशाब्दत्वविशिष्टघटि
तदृष्टार्थकभारतादौ तादृशवेदे चातिव्याप्तिः प्रमाणमात्रगोचरतदर्थविषयकज्ञानजननेऽवर्षपशाब्दत्वजातेर्ज्ञानमपेक्ष्यते तत्र ज्ञाने च साज्ञातपरंपरया शाब्द
बोधस्य ज्ञाने प्रयोजकं जातिग्रहस्य व्यक्तिग्रहप्रयोज्यत्वनियमात्। शाब्दबोधविषयज्ञाने च साज्ञात्परंपरया विषयविषयशाब्दज्ञानं प्रयोजकमिति तस्यापि नि
रुक्तशब्दोपजीविप्रमाणातिरिक्तप्रमाणजन्यप्रमितिविषयार्थकत्वादिति उच्यते शाब्दज्ञानं परंपरातिपरंपरया वा शाब्दज्ञानप्रयोज्यत्वं च यज्ज्ञानं तदति ए५०
रिक्तज्ञानविषयात्मकान्यत्वे सतीति समुदायार्थः प्रमाणतज्जन्यत्वादिप्रवेशे प्रयोजनविरहात्। परंपरातिपरंपरया शाब्दज्ञानप्रयोज्यातिरिक्तेन वेदात्मकशब्दज

न्यशाब्दबोधे न चेदार्थस्य विषयीकरणादसंभव इति परंपरया शब्दज्ञानप्रयोज्यातिरिक्तेति ज्ञानविशिष्टे शाब्दत्वं चानुमित्यादेः साध्यप्रसिद्ध्यादिद्वारा
परंपरया वेदज्ञानप्रयोज्यत्वात्तत्रासंभवः शब्दज्ञानप्रयोज्ये तदर्थस्वजन्यज्ञानसमानाकारज्ञानजनकत्वेन शाब्दो विशेषणीयः स्वपदं जन्यत्वप्रतियोगिवाक्यपरं तेना
दृष्टकार्यमात्रहेतुतया ज्ञानमात्रस्यैवादृष्टद्वारा परंपरया गंगास्नानादिबोधकविधिवाक्यज्ञानप्रयोज्यत्वेऽपि न तादृशज्ञानान्यज्ञानामप्रसिद्धिः गंगास्नानादिबोधक
विधिवाक्यस्य गेहे घटोऽस्तीत्यादिलौकिकवाक्यसमानार्थकत्वाभावात् । न वा आत्मा शाब्दवानित्यादिमानसलौकिकप्रत्यक्षानुमित्यादेरपि समानार्थकश
ब्दज्ञानप्रयोज्यातिरिक्ततया शाब्दज्ञानातिरिक्ततया च तद्विषयार्थकत्वात् आत्मा शब्दवानित्यादिमानसप्रत्यक्षादेः स्वविषयशाब्दबोधजनकीभूतशब्दज्ञान
प्रयोज्यत्वेऽपि तस्य शब्दस्यात्मा शाब्दवानिति लौकिकवाक्यसमानार्थकत्वात् नापि वेदजन्य प्रत्येकपदजन्यप्रत्येकपदार्थोपस्थितिप्रयोज्यानुमितिविषयार्थ
कतया संभवः प्रत्येकपदस्यापि वेदजन्यज्ञानसमानाकारज्ञानजनकतया पदार्थोपस्थितिमूलकानुमितेरपि तादृशशब्दज्ञानप्रयोज्यत्वात् । अत एव शब्दघटि
तदृष्टार्थकभारतादौ तादृशादृष्टार्थकवेदे च नातिव्याप्तिः तदर्थविषयकज्ञानमात्रस्य शब्दज्ञानप्रयोज्यत्वेऽपि स्वजन्यज्ञानसमानाकारज्ञानजनकशब्दज्ञानाप्रयो
ज्यत्वात् न च तथापि आत्मा शाब्दप्रत्यक्षसमवायीत्यादिरूपशब्दघटितदृष्टार्थकभारतादौ तादृशदृष्टार्थकवेदे चातिव्याप्तिः आत्मा शब्दप्रत्यक्षसमवायीति श
ब्दस्यापि तदर्थान्तर्गततत्वेन तदर्थविषयकज्ञानमात्रस्यैव स्वजन्यज्ञानसमानाकारज्ञानजनकशब्दज्ञानाप्रयोज्यत्वादिति वाच्यं । शब्दज्ञानप्रयोज्यपदेन शब्द
व्यक्तिज्ञानप्रयोज्यताविशेषस्य विवक्षितत्वात् न च तथाप्यात्मा शाब्दवानित्यादावतिव्याप्तिः तद्वाक्यात् आत्मा शाब्दवानिति वाक्यजन्यशाब्दबोधस्यात्मा
शाब्दवानिति वाक्यार्थतया तदर्थविषयकज्ञानमात्रस्यैव शाब्दबोधद्वारा आत्मा शाब्दवानिति वाक्यव्यक्तिज्ञानप्रयोज्यत्वादिति वाच्यं । पत्रापघटदृष्ट्यादिपत

चि॰टी॰ किं विशेषवेदेशाद्वत्वं गृहीत्वा तयैव सामान्यलक्षणाप्रत्यासत्त्या निखिलशाब्दबोधस्य ज्ञानं तत्तस्ते नैवज्ञानेनात्माशाब्दबानितिनिखिलशाब्दबोधप्रकारिका
ऽनुमितिस्तत्रैव तदनुमितिव्यक्तेः तदर्थविषयिका पात्रात्मा शाब्दबानितिवाक्यवृत्तिज्ञानाप्रयोज्यत्वात्। सामान्यलक्षणाजन्यज्ञाने विषयस्याहेतुत्वात्तत्सामान्यल
क्षणाजन्यज्ञानस्योभयवादिसिद्धत्वाभावेपि तदनुमितिव्यक्तेरुभयवादिसिद्धत्वात्। परन्तु शाब्दत्वप्रकारकयत्किंचिच्छाब्दज्ञानादेव निखिलशाब्दबोधप्र
कारकतदनुमितिव्यक्तेरुत्पत्तेः न च तथापि शाब्दवृत्तिज्ञानाप्रयोज्यसुखत्व दुःखासंभिन्नवृत्तिसुखमात्रवृत्तिधर्मत्वादित्यनुमित्या विषयीकृतार्थकवेदे
व्याप्तिः किं बहुना प्रमेयत्वाभिधेयत्वादिसामान्यलक्षणाप्रत्यासत्तिज्ञानाधीनेन प्रमेयमभिधेयं चेत्यनुमित्यात्मकज्ञानेन सर्वस्यैव वेदार्थस्य विषयीकर
णाद्दसंभवश्च इति वाच्यं तदन्यज्ञानस्य स्वजन्यज्ञानसमानाकारत्वेन विशेषणीयत्वात् स्वजन्यज्ञानसमानाकारत्वं च स्वजन्यज्ञानविषयिताविलक्षणविषयिता
शून्यत्वं स्वजन्यज्ञानेयत्रयत्रयेनयेन रूपेण घटविषयीकरणं तत्र तत्र तेन तेन रूपेण तत्तद्वग्राहित्वं वा स्वपदमन्यत्वप्रतियोगिवाक्यपरं अत एव वेदस्यापि यत्किं
चिदर्थस्यप्रयागादेरीश्वरमीत्यादिसत्यत्वविषयत्वेपि न व्याप्तिः अत एव च विदैकदेशेन वेदः पक्षीकृतभागस्य तादृशज्ञानविषयार्थकत्वनियमेवृत्तत्वात्। न च तथा २१
पि सार्वज्ञान्यथानुपपत्त्या योगजधर्मस्यापि निर्विकल्पकजनकत्वयायोगजधर्मजन्यस्वजन्यज्ञानसमानाकारप्रत्यक्षविषयार्थकत्वाद्वेदस्यासंभवः मो
क्षहेतुश्रवणाप्रयोज्यत्वेन तज्जन्यज्ञानविशेषणेपि सुखत्वसामान्यलक्षणाप्रत्यासत्तिजन्यमीयसुखज्ञानजन्येन सुखं दुःखासंभिन्नं सुखत्वादित्यादिकूटलिंग
कानुमानेनयत्नदुःखेत्यादिवेदार्थस्य विषयीकरणसंभवात्तादृशेश्वरज्ञानविषयार्थकत्वाद्दसंभवश्चेति वाच्यं उभयवादिसिद्धत्वेनापि तदन्यविशेषणी राम॰
यत्वात्। योगजधर्मजन्यप्रत्यक्षकूटलिंगकानुमित्योरीश्वरज्ञानस्य च प्रामाकरासिद्धत्वात् न च तथापि वेदार्थस्य योगजप्रत्यक्षमूलकानुमानविषयत्वाद

संभवइतिवाच्यं कारणबाधेन तदनुमितिव्यक्तेः प्रमाकरणासिद्धत्वात्। यो ह्यहेतुश्रवणप्रयोज्यत्वेनापि वा तदन्यज्ञानं विशेषणीयं अथ तथापि प्रमेयत्वा
दिना निखिलसामान्यप्रत्यासत्त्या वेदगतपदार्थतावच्छेदकानां ज्ञाने तत्र प्रमेयत्वादिरूपेण वेदगतपदार्थधर्मप्रमेयत्वादिरूपेण वेदगतपदार्थतावच्छेद
कानां प्रमेयत्वादिहेतुना नानुमितिः तत्र प्रमेयत्वादिना केवलपदार्थतावच्छेदकप्रकारेण पदार्थानां स्मरणात्तरस्तत्र तत्स्मरणसहकारेणानुमानाद्यदजन्य
ज्ञानसमानाकारज्ञानमिति क्रमेण वेदार्थस्य तादृशज्ञानविषयत्वादसंभवः न च तादृशानुमानजन्य वेदजन्यज्ञानसमानाकारज्ञानं कारणबाधेन न प्रमा
करसिद्धं तेन सामान्यलक्षणानभ्युपगमादिति वाच्यं तेन सामान्यलक्षणानभ्युपगमेपि पदतावच्छेदकादिप्रकारेण पतत्किंचिद्धक्तिज्ञानादेव पदतताव
च्छेदकाप्रपेणावति साध्यतावच्छेदकाप्रपेणावति साध्यतावच्छेदकाप्रपाणावता मनुमित्यभ्युपगमात्। कारणबाधाभावादिति चेत्तद्दोषस्य बहुधा निरसि
तत्वात्। प्राचामस्तु मतत्वाद्यहेतु न च तथापि सुखत्वादिसामान्यलक्षणपारदृशः सुखादेरुपस्थितया सुखं दुःखासंभिन्नमित्यादिसत्यहेतुकानुमित्या
दिसंभवेन तद्विषयार्थकत्वादसंभव इति वाच्यं तत्तज्ज्ञानातिरिक्तत्वेनापि ज्ञानस्य विशेषणीयत्वादिति संक्षेपः तदलं निष्कर्षः न त्वेवमपि वेद्विनासिं चर्ती
त्याद्ययोग्यवाक्यजन्यज्ञानस्य प्रमत्वेन प्रमेनोभयवाद्यसिद्धतया तत्रातिव्याप्तिः एवं हे फट् इत्यादि स्तोत्रे व्याप्तिव्याप्तिः तस्य निरर्थकत्वेन सत्यं तदलस्य प्रमि
तिविषयार्थकभिन्नत्वस्य तत्राप्यसत्वात्। अत्र ब्राह्मणपौर्वेदत्वमभियुक्तस्मरणात्तस्यालत्वादतः प्रमाणशब्दत्वमिति स्तोत्रस्य निरर्थकतया न प्रमाण
शब्दत्वं तस्य वेदत्वाभावेपि पुराणइवाध्ययननिषेधो वा च निकस्यवशः द्रौदीनामिति भावः प्रमाणशब्दत्वं प्रमितिजनकतया नेपाप्यसिद्धशब्दत्वं तेन पर
नपेक्षितेः सकर्तृकत्वबोधकवेदेनाव्याप्तिः तत्र पौरुषेयप्रमाणाभितहितिः सकर्तृकेति भारतादिवाक्येष्वतिव्याप्तिः तस्य शब्दप्रयोज्यहितिः सकर्तृके

वि॰टी॰ त्यनुमितिविषयार्थकत्वेपि तादृशानुमितेरीश्वरविद्वेषिप्राभाकरासिद्धत्वात्। अन्यथाख्यातावस्वीकारादिति वाच्यं। अजन्मोतदत्वेनैव तस्य निरसनीयत्वा
त्। न चात्र पदमेव स्फुटी भविष्यति स्वर्गसाधनत्वाद्यनुमापकाश्वमेधत्वादेरज्ञातमनः प्रभृति नित्यममात्रवेर्येप्युक्ता तिव्याप्तिवारणाय शब्दत्वोपादानं न चै
वं हुं फट् इत्यादि स्तोत्रेऽतिव्याप्तिः तस्य निरर्थकतया प्रमाणशब्दत्वाभावादिति वाच्यं तस्याप्यलसत्वात्। मंत्राणां त्रयी पौर्वदेवत्वमित्यभियुक्तस्मरणात्। तस्य वेदत्वाभा
वेपि दुर्बलत्वाबाध्यपत्तनिषेधो वा चलिक एव शूद्रादीनां मलादिस्मृतिभारतादावतिव्याप्तिवारणाय अजन्यांतं तस्य वेदजन्यवाक्यार्थज्ञानजन्यत्वात्। वेदार्थप्रतीत्य
स्मृत्यादिप्रणयनात् शब्दपदं वाक्यार्थपदं वा मंत्रस्वरूपकथनेन ज्ञानाजन्यत्वेव विवक्षिते। तयोर्निर्विशेषप्रयोजनविरहात् तन्यापनेपि वेदस्यापि अश्रयज्ञानजन्यत्वा
दसंभववारणाय जन्यपदं जन्यता च फलोपधानरूपा ग्राह्या तेन वेदस्यापि जन्यज्ञानस्य स्वरूपयोग्यत्वेपि नासंभवः प्रत्युत शब्दजन्यवाक्यार्थज्ञाने तस्य शाब्दज्ञा
नेत्यर्थ इति तत्र भारतार्थस्मरणाजन्ये भारतेऽतिव्याप्तिः न तस्य स्मरणाजन्यत्वेन शाब्दज्ञानाजन्यत्वात्। शाब्दज्ञानाजन्यत्वपदेन शाब्दज्ञानप्रयोज्यत्वविवक्षणे
पि भारतगतप्रत्येकपदजन्यप्रत्येकपदार्थस्मृतिसहकारेण मनसाऽनुमानादिना वा विशिष्टभावनार्थप्रतीत्यप्रयुक्तभारतेऽतिव्याप्तिः न च जन्यज्ञानाज
न्यत्वस्य तौ संस्पंतविशेषणाप्रमाणशब्दत्वमित्यत्र प्रमाणविशेषणं च व्यर्थमिति वाच्यं। दृष्टार्थकवेदेऽतिव्याप्तिवारणाय संत्यंतस्फुटं फड्डित्यादिस्तोत्रेऽ
तिव्याप्तिवारणाय प्रमाणत्वविशेषणस्योपादानात्। परनये ईश्वरानभ्युपगमाज्जन्यज्ञानाजन्यत्वेन क्वापि वेदे इत्यसंभवः। न च तन्मते वेदस्य नित्यत्वान्नास
भव इति वाच्यं। तथा सति वर्णानां नित्यत्वं विनानतरघटितवेदार्थानुपूर्व्या नित्यत्वासंभवेन शब्दमात्रस्येव नित्यतया भारतादेरपि नित्यत्वाद्भारतादावतिव्याप्तिरिती राम॰
ईश्वरस्याप्यादिति चेन्न। जन्यज्ञानाजन्यत्वपदेन जन्यज्ञानजन्यत्वेन यत्रैयायिकसिद्धं तदन्यत्वस्य विवक्षितत्वात्। अत एव तन्मतेपि जन्यपदार्थपादानेऽसंभ

वइति जन्यपदं सार्थकं खंडाभाववद्घटकत्वाच्च नन्वमते नैयायिके त्वसौ वैयर्थ्यं स्वमतमात्रसाधारणलक्षणप्रस्तुतत्वादेयमेवगुकायुक्त वेदसमानार्थक
स्य त्वादेरपितावत्पदविषयकजन्यज्ञानजन्यत्वात्तत्रातिव्याप्तिः एवं पंत्राद्धिस्थानवर्णोत्पत्तिस्वीकर्तृनपेपेत्रो स्थितस्य त्वादावपितातिव्याप्तिः तस्मा पित्रा
दरक जन्यस्तान जन्यत्वात् वाघाद्यभिघातजस्य त्वादौ च मानाभावः वाघायभिघातस्य वर्णोत्पादकत्वे मानाभावात् कंठताल्वाद्यभिघातादेरेतदुत्पाद
कत्वाच्च न त स्वर्दमवर्णपकस्यचिज्जन्यज्ञानत्वसत्वेन तस्यैव फलोपधानात्मकजन्यतापास्तत्रसत्वात् ज्ञानत्वेनकार्यत्वेन कार्यकारणभावात् नचतथापि
भगवदुच्चरितमनुस्य त्वादावतिव्याप्तिरितिवाच्यं तस्य भगवदुच्चरितत्वे मानाभावात् भगवद्गीता च वेद एव तत्रैव भगवद्गीतासूपनिषत्स्विति श्रवणादि
ति न तत्रातिव्याप्तिः वेदातिरिक्ते शाब्दशाब्दोपजीविप्रमाणमात्रप्रयोगपार्थके भगवदुक्तवाक्यांतरे च मानाभावः अथमास्त्वतिव्याप्तिस्तथाप्याधुनिकोक्ते वेद
स्यतिभारतादेरर्थं ज्ञात्वा मन्युक्ते देवचससंसपन्ने वेदेद्यातिव्याप्तिः तस्यन्यापुनषेज्जन्यज्ञानजन्यत्वादित्यातितिचेत्त्र प्रमाणशाब्दत्वपदेन एतादृशप्रमाणा
शाब्दजातीयत्वस्य विवक्षितत्वात् साजात्यं चात्र पूर्वं जनेन नातिप्रसंगः तथा साजात्यलाभायैव च शाब्दत्वपदमित्यंचादिविदेमादापेवसर्वत्र लक्षणसंग
तिः नित्यानुमेयवेदपक्षोभयवादिसिद्धतया न लक्ष्यः तेन न तत्रानुपूर्वीविरहेनोक्तजातीयत्वाभावेपि न क्षतिः तद्विरुद्धानुपूर्वीविरहितत्वेनैव वा साजात्यं वाच्यं।
नच भगवत्कृतवेदव्याख्याने वेदैकदेशे चातिव्याप्तिरितिवाच्यं अदृष्टजनकाध्ययनविषयतावच्छेदकावच्छिन्नत्वे सतीत्यनेनापि विशेषणीयत्वात्
वेदव्याख्यानादेरध्ययने तिनादृष्टजनकमिति तत्र मास्तु वेदत्वमखंडोपाधिः तच्च यथावद्वर्णसंकेर्वेदव्यावहारः प्रमाणसिद्धः तावन्न स्वयामस्तसहतिते ५र
न प्रत्येकवर्णमहणा। नतस्मिंत्यंहंयद्वाशक्तिविशेषसंबंधेन वेदपात्वमेव चेद त्वं यथाधानुत्वादिव्याहत्वादिविप्रोषपदेपादानान्नवेदसंज्ञकशरी

वि.टी०

रीत्यावतिव्याप्तिः संबंधाननुगमस्यादोषत्वाच्छक्ततावच्छेदकभेदेन शक्तेर्नानात्वेपि न क्षतिः ग्रंथस्तु प्रकृतोपयिकयत्तत्तावच्छेदकभावनिर्वचनपर इति प्राकुरि
ति संक्षेपः। नन्विदं कुतो वेदत्वे वेदानामीश्वरीयवाक्यार्थज्ञानजन्यत्वेनाजन्यानां तद्दलस्यासंभवित्वादित्यत आह ईश्वरप्रमायामिति ईश्वरीयवाक्यार्थज्ञानस्येत्यर्थः
तथा च शब्दजन्यविशेषणेनैव न द्वारणमिति भावः शब्दोपजीव्यतिरिक्तत्वविशेषणस्य व्यावृत्तिंफलतो दर्शयति वेदार्थस्येति अनुमानादीति अनुपयोग्यादी
त्यर्थः आदिपदादुपमितिपरिग्रहायपन्नदुःखेत्यादिस्वर्गपदादिशक्तिग्रहे के वेदार्थस्योपमितिविषयत्वादिति भावः। अनुमानादेरित्यनुमित्यादेः अजन्यात्त दल
स्य व्यावृत्तिंफलतो दर्शयति स्मृतीनामिति भारतादिभागस्य भारतादेः भागस्य विशेषस्य दृष्टार्थकेतरभाव इत्येकदेशस्येति यावत्। वेदसमानार्थत्वेपि तादृशप्रमि
त्यविषयार्थकत्वेपि साध्यप्रसिद्धेषमाधत्ते स्वजातीयेति स्वसमानजातीयवाक्यस्य पदुच्चारणं ज्ञानं तदनयेस्यतत्प्रयोज्यपदुच्चारणं कण्ठाद्यभिघातः प्रयत्नो वात
ज्जन्यजातीयत्वमित्यर्थः स्वसमानजातीयत्वं तज्जन्यजातीयत्वं चानुपूर्वीविवक्षितं इत्यं चाध्यापकोच्चारणमादाय सिद्धसाधनं पूर्वाध्यापकोक्तवेदज्ञानाद्वेदार्थ
ज्ञानं ततो वेदार्थप्रती (तीच्छा ततो वेदार्थप्रतीतिरूपेष्टसाधनताज्ञानाद्वेदरूच्छा ततो वेदरूपेष्टसाधनताज्ञानात्तदनुकूलकंठाद्यभिघातादिप्रयत्नस्ततः क
ण्ठाद्यभिघात इति क्रमेणाध्यापकोच्चारणस्य पूर्वाध्यापकोक्तस्वसमानानुपूर्वीकवाक्यज्ञानप्रयोज्यत्वनियमादिति भावः वेदाद्युच्चारणाप्रतीत्येवाद्यभारतप्रणा
यनाद्युच्चारणे व्यभिचारवारणाय स्वसमानजातीयेति पठ्यमानवेदभारतयोर्वा व्यभिचारवारणाय जातीयत्वमिति प्रयोज्यत्वपदेन च स्वजन्यवाक्यार्थज्ञानद्वारा प्रयो
ज्यत्वमेव विवक्षितं तमन्यथा भारते व्यभिचारापत्तेः आद्यभारतोच्चारणस्यापि भारतनिष्ठभारतार्थप्रतीतिरूपेष्टसाधनताज्ञानात्मकस्य भारतज्ञानस्य प्रयोज्य राम०
त्वात्। न च पत्रास्मदादीनां वेदसमानानुपूर्वीकं वाक्यं करणपाटवादिना घुणाक्षरन्यायेन वा दैववशात्संपन्नं तत्र तद्वेदवाक्ये तादृशोच्चारणाजन्यत्वसत्त्वेन तद्वाक्य

पे

त्वमादायांशतः सिद्धसाधनमिति वाच्यं। पक्षतावच्छेदकावच्छेदेन साध्यसिद्धेरुद्देश्यत्वात्। अत एव निखिलवेदानामेकधर्मावच्छेदेन पक्षत्वे यथक्र
तो निर्वध इति दिक्। तज्जातीयत्वादिति तज्जातीयत्वभेदाघटितत्वान्निष्टमतस पर्याप्ती तत्वस्य चाविवक्षितत्वादिति भावः। सजातीयोच्चारणेति स्वसजातीयो
च्चारणानंतरोच्चरितजातीयमात्रवृत्तित्वं साध्यं। तेन देववंससपन्नवेदमादाय न सिद्धसाधनं विजातीयोच्चारणं वार्थवत्त्वार्थज्ञानविशिष्टत्वेन विशेषणी
यः प्रमाणत्वेति अत्रेदानींतनवेदादिमात्रवृत्तितत्तद्व्यक्तित्वेदानींतनवेदत्वादिधर्मे व्यभिचारवारणाय प्रमाणतावच्छेदकेति प्रमाणतावच्छेदकत्वं
अध्यापनानन्तरविधिविषयतावच्छेदकत्वं भवति स्वाध्यायोऽध्येतव्यः स्मृतिरध्येतव्येत्यादिविधिविषयतावच्छेदकत्वे वेदत्वस्य तित्वादि उच्चरित
त्वस्य शब्दधर्मत्वाद्व्यभिचारवारणाय वाक्यवृत्तीति अश्वमेधत्वादेरपि अश्वमेधेन यजेतेत्याद्यनुष्ठानविधिविषयतावच्छेदकत्वात्। वस्तुतस्तु प्रमा
णतावच्छेदकमध्यापनविधिविषयतावच्छेदकत्वं वाक्यवृत्तीति स्वरूपकथनमिति ध्येयं। शब्दाजन्येति। शब्दज्ञानाप्रयोज्येत्यर्थः। तेन न तादृश
स्य त्यादिजन्यत्वमादायांशतः सिद्धसाधनमर्थांतरं आनुपूर्वीप्रयोज्यार्थज्ञानजन्यतायांशतः सिद्धसाधनस्य वार्यत्वेन तस्य च वारणाय स्वाकार्थेति स्ववा
क्यार्थेत्यर्थः। तादृशेति। अत्र समजातीयेति शब्दविशेषणादेयं तेन स्मृतौ भारते च न व्यभिचारः तादृशस्थले तदभावादिति। स्वसमानजातीयोच्चारणानं
तोच्चरितजातीयत्वं शब्दाजन्यवाक्यार्थज्ञानजन्यतज्जातीयत्वयोरभावादित्यर्थः। जन्यत्वेति। प्रत्यक्षादिनागृहीतार्थकलौकिकवाक्ये तथादर्शनेन तत्र
कल्पने इत्यर्थः। लौकिकवाक्येति मीमांसकसिद्धेति। लाघवादिति। तानसमकृते इत्यर्थः। न्यायोऽनुमाने। अध्यापनेतेऽर्थप्रतीतिरिति। अध्यापने सति तदर्थप्र
तीतिरित्यर्थः। ततो वेदप्रयोग इति शेषः। स्वतंत्रपुरुषेणेति। सजातीयोच्चारणानपेक्षोच्चारयितृपुरुषेणेत्यर्थः। परंपरादेरिति। तादृशोच्चारणापेक्षवेदोच्चारयितृ

चि॰टी॰ ऽपुरुषादेरित्यर्थः। ननु सर्गाद्यकालीनवेदप्रयोगस्य वेदजन्यवाक्यार्थज्ञानप्रयोज्यत्वं न संभवति प्रलये वेदोच्छेदात्तो भगवत्सिद्धिरित्यत आह। किं
चेति। पूर्वकाल इति। हेतुतावच्छेदकभिन्नस्येदपदत्वावच्छेदकत्वं पूर्वेति। एतत्कालपूर्वकाल इत्यर्थः। न वेदशून्य इति। यद्यपि वेदवानित्येव वक्तुमुचितं तथा
पि पराभिमतवेदशून्यत्वाभाववत्त्वप्रकारकसिद्ध्यर्थमित्यनभिधानं ग्रंथे। प्रलयपक्षेपो: अंशे चेति। सर्गकाले चेत्यर्थः। आश्रयासिद्धिः सिद्धसाधनात्पक्षत्वा
भावः। अंशत्वेन विशिष्य प्रलयत्वादिना उद्देश्यप्रतीतेरिति। पक्षतावच्छेदकावच्छेदेन प्रतीतेरित्यर्थः। गुर्वध्ययनेनेति। पूर्वकत्वं प्रयोज्यत्वं। अन्यथा पूर्व
सर्गीयाध्ययनपूर्वकत्वेन सिद्धसाधनात्। गुर्विति स्वरूपकथनमिति मन्तव्यं। अध्ययनत्वात्। अतो न व्यभिचार इति। लिपिप्रयोनि: साक्षात्परंपरासाधारण
प्रयोज्यस्यांशे प्रवेशादिति भावः। न चैवमिति। भारताध्ययनं भारताध्ययनपूर्वकं भारताध्ययनत्वादित्यनुमानसंभवादिति भावः। तथ्येति। तथा च बाधा
न्न सिद्धिरिति भावः। अन्योन्याश्रय इति। वाक्यार्थयथार्थज्ञानपूर्वकत्वाधीनं वेदप्रामाण्यं तद्वेदप्रामाण्यं च न प्रमाणीभूतपदजन्यत्वाधीनमिति परंपर
या वेदप्रामाण्याधीनं वेदप्रामाण्यमित्यन्योन्याश्रय इत्यर्थः। प्रमाणांतराभावादिति। स्वतः प्रामाण्याभावादित्यर्थः। अंधपरंपरेति। प्रमासामान्यस्य स्वतः
प्रमाणमूलकत्वव्याप्तिभंगप्रसंगादित्यर्थः। स्वतंत्रत्वं चानुभवप्रमाधीनप्रामाण्यकेतरत्वमिति भावः। वेदे वेदजन्यज्ञाने परवेदापेक्षत्वेनेति। अपर
वेदप्रामाण्याधीनप्रामाण्यकत्वेनेत्यर्थः। विश्वासबीजेति। प्रामाण्यतत्त्वव्यापकेत्यर्थः। परानपेक्षेति। स्वेतरप्रमाणाधीनप्रामाण्यकेतरेत्यर्थः। अंधपरं
परेति। स्मृतिजन्यज्ञानस्याप्रमात्वप्रसंगाभेपनेत्यर्थः। ननु वेदप्रामाण्यमप्यपरप्रामाण्याधीनं महाजनपरिग्रहादेव तत्प्रामाण्यावधारणादित्यत आह। राम॰
अनादीति। परिग्रहादिति महाजनपरिग्रहादित्यर्थः। परिग्रहोऽध्ययनाध्यापनतदर्थानुष्ठानादिः। तन्निर्वाहकेति महाजनपरिग्रहनिर्वाहकं यत् महाज

नानोत्तज्ञानजनकं प्रमाणं तद्रूपेतरप्रामाण्याधीनप्रामाण्यकं तेन स्मृतिमूलभूतप्रमाणकत्वाभावेनेत्यर्थः। अनाश्वासएवेति वेदजन्यप्रमाणप्रा॰ प्रमात्व
ग्रहणएवेत्यर्थः। एवमिति महाजनपरिग्रहरीत्यर्थः। प्रमाणमूलकत्वेति· वेदमूलकत्वेत्यर्थः। आर्षीसर्वीजेति प्रामाण्यबीजेत्यर्थः परानपेक्षिते
तिनेत्यर्थः। ईश्वरप्रत्यक्षेति ईश्वरीयोपादानप्रत्यक्षेत्यर्थः। अनुमानमपीति अध्यापनपरत्कानुमानमित्यर्थः। प्रत्यक्षं विना नित्यप्रत्यक्षमूलकं विना
रज्ञानमनुमितिप्रतिबंधकज्ञानं भवति तदनुमितिजनकव्याप्तिज्ञानविघटकमपि भवति तथात्राप्यबाध्या कृतिसाध्यता
निश्चयस्य चिकीर्षाप्रतिबंधकत्वान्न तेनैव हेतुना चिकीर्षाजनकज्ञानविघटकत्वं तस्माद्यत्ने पक्षधर्मताबलात् कृतिसाध्यताज्ञा
नस्यैव चिकीर्षाजनकत्वसिद्धिरिति भावः। न च जनकज्ञानविघटकत्वस्याप्रसिद्धतया तद्दृष्टान्तदौर्बल्याद्धेतुत्वात्स्वरूपासिद्धि
रिष्टेति नापि सिद्धिरिति वाच्यं प्रतिबंधकत्वं हि न कारणीभूताभावप्रतियोगित्वं किन्तु प्रयोजकीभूताभावप्रतियोगित्वं प्रयोजकत्वं
च कारणतत्कारणान्यतरत्वं यथा हि द्विचतुष्टयरहितस्यापि तिनियतपूर्ववर्त्तित्वं कारणत्वं तत्कारणसाधारणं हेतोर्ज्ञानघटकोपा
दानादेव च विषयोत्तरसंबंधादेव व्यभिचारः साध्यवज्ज्ञानघटकजनकीभूतस्याभावविघटकतया सिद्धसाधनवारणाय। यद्य रम०
पि वाभावस्य विघटकत्वे प्रतिबंधकत्वं न स्यात्तथापि विघटकत्वविरोधित्वमात्रमभिप्रेतमिति न दोषः वस्तुतः साध्यजनकज्ञानमि

मत्रज्ञानपदं स्वरूपकथनं । ननु साध्याप्रसिद्धमपि । वस्तुगत्या तत्र ज्ञाने तेन जन्यत्वकत्वस्य विवक्षितत्वात् विघटकत्वं प्रतिबंधकत्वमेव । त
देकावच्छेदेनैकाधिकरणवृत्तित्वं विरोधित्वं अन्यथा गुरुत्वेऽभाववृत्त्याधिकरणज्ञानत्वरूपतयाकृत्स्नसाध्यताज्ञानव्याप्तिमत्साध्य
ताज्ञानाभावस्य ज्ञानात्मकरूपविरोधितया सिद्धसाधनापत्तेः न च कृत्स्नसाध्यताज्ञानाभावः केवलाधिकरणज्ञानात्मकः कृत्स्नसा
ध्यताज्ञानाद्भिन्न एवेति एककालावच्छेदेन एकाधिकरणावृत्तित्वरूपविरोधस्यैवेऽपि प्रतिबंधकत्वरूपविरोधित्वमेव साध्ये प्रवेशनो
पमिति चेन्न तथापि क्वाचित्ककृत्स्नसाध्यताज्ञानव्याप्ति केवलाधिकरणज्ञानात्मकत्वस्याकृत्स्नसाध्यताज्ञानाभावरूपस्य कृत्स्न
साध्यताज्ञानाभावत्वेन विकल्पितजन्यस्य प्रतिबंधकत्वे निखिलकृत्स्नसाध्यताज्ञानाभावे इति सिद्धसाधनापत्तेः तस्य च ज्ञा
नत्वेनाजनकत्वाद्विवक्षितेन सदोषपद इति बोध्यं न चासाधुत्वज्ञाने साधकत्वज्ञानजन्यशाब्दधीप्रतिबंधकेऽव्यभिचार इति वाच्यं
- मिराकांक्षत्वरूपासाधुत्वज्ञानेऽप्याकांक्षाज्ञानमादाय साध्यस्यापि सत्त्वादन्यथा दृष्टसाधकज्ञानस्य च बंधकत्वे मानाभावात्
। गुरुत्वेऽपि साधुत्वज्ञानस्य कारणताच्छेदकत्वेन तथापि सिद्धोऽव्यभिचार इति वाच्यं गुरुत्वेऽपि सिद्धेः प्रतिबंधकत्वात् । तद्ग्राहकप्रतिबं
धकताया वा हेतौ निवेश्याच्च अत एवासिद्धत्वज्ञानाजन्येच्छाप्रतिबंधके सिद्धत्वज्ञानेऽपि नाव्यभिचारः तद्ग्राहवृत्तिप्रतिबंधकताया
एव हेतौ निवेशात् तत्रासिद्धत्वज्ञानाजन्येच्छाप्रतिबंधके सिद्धत्वज्ञानेऽपि नाव्यभिचारः तद्ग्राहवृत्तिप्रतिबंधकताया एव हेतौ नि
वेशात् असिद्धत्वनिश्चयपक्षेऽपि सिद्धहेतुत्वाभ्युपगमाद्वा अथ तथापि बाधसत्प्रतिपक्षादौ व्यभिचारः नन्वत्र ग्राहकत्वप्रतिबंधक

चि·म·श

ज्ञातहेतौ निवेशनीयेति वाच्यं कृतसाध्यताज्ञानव्यभिचारज्ञानाभावयोरपि बाधाभावतयैव चिकीर्षानुमितौ प्रयोजकतया स्वरू-
पासिद्धिदृष्टान्तासिद्ध्योरापत्तेः न च साक्षाद्विरोधित्वेनैव तत्पक्षे न हेतुविशेषणीयमिति वाच्यं साक्षाद्विरोधित्वं हि न याप्त्याभा-
वतद्व्याप्याद्यनवगाहित्वं प्रकृतेपि तदसिद्धेः कृतसाध्यताज्ञानस्यापि चिकीर्षाप्रतिबन्धकीभूतकृतिसाध्यत्वाभावानवगाहित्वा-
त् अत एव नञ्भावणी भूताभावप्रतियोगित्वमपि प्रकृतेपि तदसिद्धेः पूर्वपक्षिणा कृतसाध्यताधीपदैः साक्षादेव प्रतिबन्धकत्वा-
भ्युपगमात् न च हेतौ प्रतिबन्धकज्ञानत्वपदेन ज्ञानत्वावच्छिन्नप्रतिबन्धकताशालित्वं विवक्षितं व्याप्यत्वग्रहप्रतिपक्षयोस्तु नि-
श्चयत्वेन प्रतिबन्धकत्वमिति वाच्यं । प्रकृतेपि तदसिद्धेः उक्तरूपज्ञानात् कृतसाध्यतानिश्चयस्यैव पूर्वपक्षिमते प्रतिबन्धकत्वात् इ-
ति चेन्न हेतौ स्वग्राह्यविरोधित्वावगाहिज्ञानभिन्नत्वेन यथाश्रुतविशेषणात् स्वपदं प्रतिबन्धकज्ञानपरं चिकीर्षापाद्यं ज्ञानाभिन्न-
त्वादेरवसंग्रहः विघटनीयज्ञानस्य प्रतिबध्यप्रतिव्यभिचाराद्यनिश्चये सती निर्विशेषणत्वे दोषाद् इति केचित् वस्तुतो यादृशज्ञानसं-
शयानिश्चयसाधारणं यत्प्रतिबन्धकं तज्जातीयत्वे विघटयेदेव तथा विषयसिद्धिः संशयसाधारणी नानुमितिप्रतिबन्धिकाना-
पि सिद्धत्वज्ञानं संशयसाधारणमिच्छाप्रतिबन्धकं सिद्धत्वसंशयेपीच्छादर्शनात् न च सिद्धत्वसंशये वृत्तिविशिष्टव्याप्यसत्त्वाच्छे-
नेच्छेति तत्र तन्निश्चयस्य हेतुत्वाद् व्यभिचार इति वाच्यं तत्रापि बलवदनिष्टाननुबन्धित्वनिश्चयविघटकतया साध्यसंभवात् न च ९०
कृतसाध्यतासंशयोपि न प्रतिबन्धक इत्यसिद्धिः तस्य प्रवृत्तिमात्राप्रतिबन्धकत्वेपि निष्कंपप्रवृत्तौ तथात्वात्तद्विशेषयोरिति न्याये

८३

नचप्रवृत्तिसामान्येकृतिसाध्यताज्ञानमात्रस्यप्रयोजकत्वात्तच्चज्ञानंतद्व्यक्तित्वसंशयेपिनिष्कंपप्रवृत्तिप्रतिबंधकेव्यभिचारः एवंतत्सामर्थ्यसंशयेपि
शाब्दप्रतिबंधकेतथामरिकारनयेपतायेनिष्कंपप्रवृत्तावहेतुत्वादितिवाच्यंप्रतिबध्यसमानविशेष्यकत्वेनज्ञानविशेषणतादि
स्यात्तु।स्वग्राह्यविरोधिकावगाहित्वंतुस्वयंपत्रयस्माव: तद्याप्यतद्वच्छेदकाधम्यंतममवगाहते।तत्रतद्वगादित्वं।एवंवादितत्वेनापि
हेतोप्रयतपदार्थोविशेषणतीयः तेनेष्टभेदग्रहेप्रवृत्त्यादिप्रतिबंधकेतन्मयेनव्यभिचारः संवादिप्रवृत्तौवविशिष्टज्ञानमेवहेतुरितिसा
ध्यसत्वादेवनतामात्रायव्यभिचारः नचतथापिकूटलिंगस्थलेलिंगसंसर्गाग्रहेलैंगिकसंसर्गाग्रहाधीनस्वत्वादिच्छाप्रवृत्तिप्रतिबंध
केष्टभेदग्रहेजनकीभूतविशिष्टज्ञानविघटकत्वाभावाद्व्यभिचारइतिवाच्यं।विशिष्टज्ञानस्यसंवादीच्छाप्रवृत्तिहेतुत्वेनानोपपत्तेःतत्रापी
च्छाप्रवृत्त्योर्विषयांतरविषयकत्वकल्पनेन।विसंवादित्वस्यतैःस्वीकारादितिदिक्।अन्यथाएतादृशस्याप्यनंगीकारेसरूपस्यसाध्यते
तिद्दृष्टतार्थश्चानिष्टसाधनत्वेवलवदनिष्टसाधनत्वेउपेक्षास्थलेऽतिप्रसंगादाह।उपेक्षणीयत्वेइष्टसाधनतावच्छेदकरूपशून्यत्वं
।निवृत्तत्वंदृष्टफलोपधानत्वस्यत्वेनतद्भिन्नेपोपेक्षः।उभयमपिगौवज्ञानंप्रतिबंधकमितिनव्यर्थतेतिवोध्यंप्रतिबंधकंचिकीर्षाप्रतिबं
धकं।क्रियाज्ञानमेवसेवकारेणेष्टसाधनताज्ञानव्यवच्छेदः सोऽदृष्टीपमनमेवत्वंव्याप्तिप्रतिवन्धितिप्रसन्नइतिवाच्यवित्वात्वाधकता
नएतच्चचिकीर्षापदस्ययौगिकत्वपक्षेचिकीर्षापदस्याखंडरूढत्वपक्षेत्वावेहलाघवादितिकृतिसाध्यत्वप्रकारकेच्छात्वापेक्षयाकृ
तीच्छात्वस्यप्रवृत्तिनिमित्तस्यप्रवृत्तिहेतुतावच्छेदकस्यवालघुत्वादिसर्थः।चिकीर्षाचिकीर्षापदप्रतिपाद्याप्रवृत्तिहेतुरितिस्पष्टीवेद्धतिदृष्टि

वि॰ वा॰ र्भवतीति चेदेवेच्छाविषये इष्टसाधनताज्ञानात् इष्टसाधनताज्ञानमात्रात्कृतिसाध्यताज्ञानं विनापि इष्टसाधनताज्ञानादिति यावत् तत्र कृतिसाध्यत्व
स्याप्रकारतया कृतसाध्यतानिश्चयप्रयोज्यप्रतिबंधकतया च कृतिसाध्यतानिश्चयस्याप्रतिबंधकतया च कृतिसाध्यताज्ञानस्य हेतुत्वे माना
भावादिति भावः अत्र इष्टिर्भवतीति चेदेवेति मस्याप्यंगको दृष्टांतः गुरुतल्पेऽपीष्टिसाध्यं सुखं भवतीति चेदेवविशेषणात् तथा सुखत्वमिव
इष्टिमपि विषयीकरोति ननु इष्टिर्भवतीति स्यात् अत इच्छा कृतिसाध्यत्वाप्रकारकेच्छां प्रति सुखत्वं तु स्वाभाववत्प्रकारकज्ञानस्यो
हेतुत्वेन कृतिसाध्यत्वाप्रकारकोपायेच्छापाः अलीकत्वात् इष्टिसाध्यं सुखं भवतीतीच्छायां तु सुखे इष्टिसाध्यत्वज्ञानमेव हेतुरिति म
न्तव्यं। वह्निना साधयामीति वदितिसाध्यत्वप्रकारिकायाः इति शेषः। अनुभूयमानायाः नियतमनुभूयमानायाः स्वनंतावाच्यत्वेन।
स्वनंताप्रतिपाद्यत्वेन। गौरवेणाप्रवृत्तिनिमित्तगौरवेण मत्या व्याप्तुमशक्यत्वादितिकारणताज्ञायाः प्रयोज्यत्वानुपशक्यत्वादित्यर्थः। त
पाकं चिकीर्षापदप्रतिपाद्यापि सा प्रवृत्तिहेतुरिति भावः। अन्वयव्यतिरेकाभ्यां प्रामाणिकत्वात्तु गौरवमपि न दोषायेति बोध्यं। प्राधान्ये
नेति विशेष्यतयेत्यर्थः। अप्राधान्येन विषयत्वस्य तत्र द्वितीयार्थत्वे पाकत्वं चिकीर्षतीत्यपि प्रयोगापत्तेरिति भावः। ननु कृतेरिति अतो
नकृतीच्छा चिकीर्षापदप्रतिपाद्येति भावः। ननु पाकं चिकीर्षतीत्यत्र पाकस्य विशेष्यतयाइच्छाविषयत्वमनुभूयते इत्ययुक्तं सनप्रत्ययस
मभिव्या। स्तधातोरिच्छाविशेष्यवाच्यत्वेन धात्वर्थस्येच्छाविशेष्यत्वात् इत्यत आह धात्वेति। प्रकारवाचित्वमिति। ननु विशेष्यवाचित्वमि राम॰
तिशेषः। प्रकारस्य प्रकृते कृतिसाध्यत्वं साधनतासंसर्गेण कृतिर्वा आद्ये तु लक्षणादिकं शरणमित्यस्वरसेन तत्पदोपि धात्वर्थः कृतिरेव तत्प्रकारि

द्वेषच्छानुपपत्तेर्ननु कृतिसाध्यत्वप्रकारिकाऽऽरिकालस्यप्राप्तादिकस्थले वेदनाभावात्तथापि साध्यत्वसंबंधेन कृतिप्रकारिकेच्छैव चिकीर्षापदार्थ
स्तिपाधाकृग्रहणमपीति द्रष्टव्यं भोजनं स्याद्विशेषणतयानयेति वा स्वविषयकभोजनप्रकारकेच्छा ग्रपदार्थस्य पेवाधादिति भावः ननु कृतिसा
ध्यत्वप्रकारकेच्छायाः नियमतः कृतिहेतुत्वमनुभवसिद्धं तेषामप्रवृत्तिहेतुत्वे वक्तव्ये गौरवान्न किं तु कृतीच्छैव इष्टसाधनताज्ञानेन तस्या ऽ
पि प्रवृत्तिहेतुत्वसंभवात् न चैवं क्लिप्यापादिष्टसाधनताद्विज्ञानेपि कृतेरिच्छापत्ताद्विज्ञानात्प्रवृत्त्यापत्तिरिति वाच्यं इष्टताज्ञानस्य प्रयत्नं वा
पि कृतेरिच्छानुत्पन्नत्वादिज्ञानस्याथा मपि किं च प्पादिष्टज्ञानकृताद्विज्ञानात् प्रवृत्त्यापत्तेस्तुल्यत्वादित्यत आह इष्टसाधनतेनेतीष्टसा
धनताज्ञानेनेत्यर्थः तृप्तादिवेति प्रवृत्तिरेव मिलितेष्वशः करोतीति एतादृशानुव्यवसायेनेत्यर्थः ज्ञानचिकीर्षाप्रवृत्तीनामिति प्रवृत्तिसमस्तप्रवृत्तिका
रणज्ञानचिकीर्षयोः समानविशेष्यकत्वनियमी कारणादित्यर्थः इदमुपलक्षणं अतिप्रसंगभंगाय तद्विशेष्यकृतौ तदनुकूलकृतीच्छाया ए
व हेतुतायाः क्लृप्तत्वात् पाकानुकूलकृतीच्छातः स्वकृतिसाध्यत्वप्रकारकपाकेच्छातस्याः प्रमशरीरे चेत् लाघवं गौरवमपि नानिश्च एवं धेयं।
वस्तुस्थितिसेपमात्रं वक्ति अथेति क्रियासाधपिनुमितिकृतिसाध्यत्वप्रकारिकेत्यर्थः स्वाचिकीर्षा विकीर्षितस्य पाकस्य तृप्तिचिकीर्षाविषयता
वच्छेदकपाकतावच्छिन्नस्येत्यर्थः अन्यतः सिद्धो अन्यतः सिद्धत्वग्रहे सा पाकत्वप्रकारिका नायं गच्छेत् न नजायेत तदापि जायेतेति पावता उपा
यविशेषसाध्यत्वेनेति एकोपायसाध्यत्वप्रकारिकेत्यर्थः उपायो तु एवाधीनतिन्नुपायांतराधीनमसिद्धत्वज्ञानेनेत्यर्थः प्रीत्या इति धनलाभस्यापी
त्यासिद्धत्वज्ञानेपीत्यर्थः प्रतिग्रहेणापि निमित्तग्रहसाध्यत्वप्रकारकधनलाभेच्छेत्यर्थः अनिर्वेदः उत्सवचिन्हेतोः प्रयत्नेरिति पाकस्य तथा चतद

त्रि·म·शा· पापसाधनत्वप्रकारकेच्छां प्रति तद्व्यापत्तेः सिद्धत्वज्ञानस्यैव प्रतिबंधकतया उपायांतराधीनसिद्धत्वज्ञानेपि कृतिसाध्यत्वप्रकारकेच्छोत्पत्तौ न बाधकं
इति भावः। स्वविषयसिद्धत्वव्याप्ति स्वविषयतावच्छेदकावच्छिन्नविशेष्यताकसिद्धत्वज्ञानस्य सत्वे। पाकत्वेन रूपेण पाककृतिसाध्येच्छा तदा पाक
त्वावच्छिन्नस्य व्याप्यतः सिद्धत्वपीच्छाविच्छित्तिप्रसंगः यदा तु स्वकृतिसाध्यत्वेनेष्टसाधनत्वेन तदा व्यतः पाकसिद्धानिच्छाविच्छेदेन भवत्स्वेमेति भावः
पयाश्कत पाकं कृत्वा साधयामीतीच्छा अन्यतः सिद्धपाकाविषयतया न सिद्धेऽनाविश्वेत्तरनुपपादकत्वात् न च तस्यान्यतः सिद्धपाकोपि वि
षयः यत्किंचित्पाकप्रकारकेच्छायाश्चानभ्युपगमादिति वा यत्तथापि पाकत्वरूपेणान्यतः सिद्धपाके सिद्धत्वज्ञानेतेन रूपेणासिद्धपाकपात्रेत
दापत्तेस्तादृशस्यानभिन्नप्रकारकस्यापि सिद्धत्वज्ञानस्य प्रतिबंधकत्वापानाच्च सिद्धत्वं च कचिदुत्स्वत्वं कचिद्विषमाना तत्कचिच्चदेश
साध्यताविरोधिरूपं यथा दुःखप्रागभावादौ प्रतिबंधकाभावकूटस्यैव हेतुतात्वेनानुगमो दोषाय न चैवं सिद्धयामादौ कृपानिच्छेति
वा यत्तत्र ग्रामादिलाभस्यासिद्धस्यैवेच्छाविषयतान्न तु ग्रामादेरिति भावः। उपायेच्छाविरोधित्वात् उपायेच्छानुत्पादप्रयोजकत्वात् फ
लेच्छाविच्छेदस्य प्रतिबंधकताभावेन यथाश्रुतासंगतेः तत्र चिकीर्षितस्य पाकस्यान्यतः सिद्धत्वज्ञानस्थले सिद्धत्वं सिद्धत्वग्रहः पाक
स्य सिद्धत्वज्ञानात् विषयसिद्धत्वज्ञानेश्रोदनस्यासिद्धज्ञानात् फलेच्छाविच्छेद इति भावः ननु स्वविषयतावच्छेदकावच्छिन्नविशेष्यताकसिद्धत्व
ज्ञानत्वेन प्रतिबंधकत्वे स्वत्वांतर्भावात् अननुगमः। न च तद्धर्मप्रकारकतद्धर्माश्रयविशेष्यकेच्छां प्रति तादृशसिद्धत्वज्ञानं विरोधीति वाच्यं विसं एल०
वादिरिच्छायाः संग्रहात् अथ तद्धर्मप्रकारकेच्छां प्रति तद्धर्मावच्छिन्नविशेष्यताकसिद्धत्वज्ञानं विरोधि न चैवं शूद्रादिपाके सिद्धत्वज्ञानेपि ब्राह्मण

स्वपाके चिकीर्षा न स्यादिति वाच्यं। तदानीं स्वीयपाककृत्वादिरूपेण ज्ञानस्य चिकीर्षास्यादात् पाककृत्वरूपेणात्मत्वं तु पक्षाद्दिति चेन्न ग्रामस्तन्मे भवतिमा
दिसिद्धग्रामादिगोचरेच्छायां ग्रामत्वादिरूपेण सिद्धत्वज्ञानेपि ज्ञायमानायां व्यभिचारात् कपालत्वविशयुपादानेच्छायां व्यभिचारस्य सिद्धत्वज्ञान
दशायां तदनभ्युपगमेन तदानीं प्रवृत्तेरप्यपलापप्रसंगात् उपादानेच्छायाः प्रवृत्तौ हेतुत्वात् अतस्तद्धर्मप्रकारतावच्छिन्नमुख्यविशेष्यताकेच्छां
प्रति तद्धर्मप्रकारकतावच्छिन्नविशेष्यताकसिद्धत्वज्ञानं विरोधि न तो ग्रामस्तन्मे भवत्विति सिद्धग्रामादिगोचरेच्छायां व्यभिचार इति कस्यचित् प्र
लपितमप्यपास्तं कपालत्वविशयुपादानेच्छायां व्यभिचारात् पाककृत्वादिरूपेण सिद्धत्वज्ञानदशायामकृतसाध्यः पाको भवत्विति चिकीर्षाया
नुपपादकत्वादिरूपेण सिद्धत्वज्ञानदशायामपि नीलो घटो भवत्विति इच्छायाः अनुपपत्तिप्रसंगाच्चेति। एवं तद्धर्मोद्देश्यतावच्छेदककेच्छां प्रति
तद्धर्मप्रकारकसिद्धत्वज्ञानस्य प्रतिबन्धकत्वात् उद्देश्यत्वं च भवत्वित्यादिपदाभिलप्यमानो विषयताविशेषः। ग्रामस्तन्मे भवति मा दृत्तु ग्रामादिर्नो
द्देश्यः किं तु तत्स्वत्वमेव। एवं कपालत्वविशयुपादानगोचरेच्छायामपि कपालत्वादिर्नोद्देश्यः उद्देश्यतावच्छेदकत्वं च तत्स्वप्रोक्ताधिकरणत्वं तेन घट
त्वादिरूपेण सिद्धत्वज्ञानदशायां नीलो घटो भवत्विति इच्छानुपपत्तिः। अत एव स्वस्यां पाकादिविशेष्यकचिकीर्षायां पाकत्वादिमात्रनोद्दे
श्यता सा पाकत्वादिरूपेणासिद्धत्वज्ञानादेवापैति प्रत्यासत्तु स्वकृतिसाध्यपाकत्वादिरूपेणासाधनुस्वकृतिसाध्यपाकत्वादिरूपेणासिद्धत्वज्ञानादेवापै
तीति विभागः। तादृशविलक्षणविषयतानंगीकारे तु तत्र घटकितेनैव प्रतिबध्यताप्रतिबन्धकतानुत तद्घटितत्वेन तत्सामान्यतः तत्तद्धर्मावच्छिन्न
विशेष्यताकसिद्धत्वज्ञानत्वेनैव सामान्यतः तत्केचित्तु पद्धर्मावच्छेदेनेष्टसाधनताज्ञानाधीनेच्छात्वात्तद्धर्मप्रकारकसिद्धत्वनिश्चयो विरोधी स्वसाध

वि·म·श· नत्वस्वपत्र पाकत्वरूपेणाग्रहीतं तत्र पाके तत्प्रकारकसिद्धत्वाधियैव साध्यगच्छाति। यत्र स्वकृतिसाध्यपाकत्वादिना तद्व्यगतं तत्र तद्वच्छिन्नासिद्धेवेति
विभागः तेन प्रतिग्रहसाध्यधनत्वाभवत। सेष्टसाधनताविच्छेदकतात्तप्रकारकातेनाक्षानाभेपिन तदयगमः नैवसिद्धत्वज्ञानदशायामपिज्ञा
यमानायांघटपागादिसाध्यकप्रवृत्तिजनकत्वकपालादिविराद्युपादानेच्छायां व्यभिचारइतिवाच्यं। गुरुत्वनये उपादाननिष्टचिकीर्षाविषयसा
धनताज्ञानस्यसमानाकरादेवप्रवृत्तिहेतुत्वेनतादृशेच्छायोमानाभावात। तच्छायेस्फुटीभविष्यति एवं न्यायनयेपि नवतथापियथा पाकत्व
रूपेणेष्टसाधनताज्ञानात्तद्धृतिसाध्यत्वप्रकारकज्ञानसहकृतात्पाकः कृतिसाध्योभवत्वितीच्छा तथाग्रामत्वादिरूपेणासिद्धग्रामादाविष्ट
साधनताज्ञानात्स्वीयत्वप्रकारकज्ञानसहकृतात् ग्रामोमेस्वत्ववान्भवतु इति सिद्धग्रामादिविषयकेच्छास्तत्रोवाधकाभावात्तत्रव्यभि
चारः ग्रामत्वादिरूपेणासिद्धत्वज्ञानेपितदुत्पत्तेरिति वाच्यं स्वकृतिसाध्यत्वातिरिक्तस्थलेतत्प्रकारकफलार्थीच्छायांतत्प्रकारकफलसाधन
ताज्ञानस्यपृथक्त्वेनहेतुतया ग्रामत्वरूपेणेष्टसाधनताज्ञानात्तादृशेच्छायामसिद्धिरिसाकुः तदसत्गुरुनयेभिन्नविषयकेच्छायाःसं
ग्रहात। घटादिसाध्यकप्रवृत्तौघटादिचिकीर्षावत्कपालाद्युपादानकप्रवृत्तौकपालादीच्छायात्र्यपिहेतुत्वेनकपालाद्युपादानेच्छाया
व्यभिचारएवदुर्वारत्वाच्च अन्यथा चिकीर्षाविषयसाधनताज्ञानस्यलौकिकप्रत्यक्षस्य चाविशिष्टत्वेपि यत्रेच्छा तत्रैवोपादानतयाप्रवृ राम
त्तिर्यत्र नेच्छा तत्र नेति नियमानुपपत्तेः न्यायमीमांसासिद्धांतस्य च युक्तिविरुद्धत्वेनानुपादेयत्वादितिसंक्षेपः ननु तथापि तत्र पाकत्वौदन
त्वाभ्यांसामान्यतःसिद्धपाकतज्जन्यौदनयोःसिद्धत्वग्रहात्पाकत्वौदनत्वाभ्यांपाकौदनयोरिच्छामास्तु औदनो तत्प्रकारकौदनेच्छायापाकौ

तस्य कारकृपाकृतम् चिकीर्षानुत्पादे तत्र आह अन्योऽस्त्विच्छापामिति चेदिदं नांतरत्वप्रकारकेदं नेच्छापामि स्मयेत्तपाक चिकीर्षापाकांतरत्व
प्रकारिकापाकांतरचिकीर्षाप्रसूतेति पाककृतावच्छिन्नस्यान्यतः सिद्धत्वज्ञानदशायामिति दोषः। असिद्धत्वादिति पाकस्यासिद्धत्वज्ञाने
पिपाकानुकूलकृतौ सिद्धत्वाज्ञानादित्यर्थः इति विषयसिद्धत्वेतिकानिविषयस्य पाकादेः सिद्धत्वधीमर्थः नविशेषिणोनकति विष
यकेच्छाविरोधिनौ नन्वेवं धनलाभत्वरूपेणाधनलाभे प्रीमासिद्धत्वज्ञाने सुखत्वसामान्यरूपफलेच्छाजन्याधनलाभत्वरूपेणाधनलाभे
प्रतिग्रहसाध्यत्वप्रकारिकेच्छापि मा जायतां स्वविषयतावच्छेदकावच्छिन्नधर्मिताकसिद्धत्वज्ञानसत्वात् प्रीत्याधीनधनलाभनन्यसु
खसुखत्वप्रकारकसिद्धत्वज्ञानसत्वेन सुखसामान्यरूपेणाफलेच्छाविच्छेदस्त्वेत्यत्रेष्टापत्तिमाह प्रीत्याधीनलाभे चेति धनलाभत्वरू
पेणाधनलाभे प्रीत्यासिद्धत्वज्ञाने चेत्यर्थः तदधिकत्वाविच्छेतितदधिकसुखत्वप्रकारकफलेच्छाजन्यात्तदधिकधनलाभेच्छेत्यर्थः नवि
च्छिद्यते इत्यथनेन स्वतद्धर्मावच्छिन्नस्यासिद्धत्वात् सिद्धत्वात् सिद्धत्वाज्ञानात् तत्तत्फलेच्छायांश्चेति तदधिकसुखत्वप्रकारकतत्फलेच्छायांश्चेत्य
र्थः धनमात्रार्थिनश्चेति धनमात्रार्थिनश्च प्रतिग्रहे शान्तानिःस्पृहस्यापि तल्लाभे नास्त्येवेति योजना धनमात्रार्थिनलाभत्वावच्छिन्नविशेष्यताक
प्रतिग्रहसाध्यत्वप्रकारकेच्छा प्रीत्यातल्लाभे धनलाभत्वावच्छिन्नाविशेष्यकाप्रीतिसिद्धत्वग्रहे नास्त्येव न भवत्येवेत्यर्थः धनमात्रस्यासिद्धत्वा
दिति धनलाभत्वावच्छिन्नस्यासिद्धत्वज्ञानादित्यर्थः। ननु धनलाभत्वरूपेणाप्रीतिसिद्धधनलाभरूपेणाप्रीतिसिद्धत्वग्रहोऽस्ति न तु प्रतिग्रहसा
ध्यधनलाभेपि तत्वस्यान्यथाख्यात्यापत्तेः तथा च तत्सत्वे धनलाभत्वरूपेण प्रतिग्रहसाध्यधने प्रतिग्रहसाध्यत्वप्रकारकेच्छायां किं बाधकमित्यत

चि॰म॰श॰ आहार्यं विद्विशेषसिद्धौ वेति। सामान्यधर्मप्रकारकपक्षोल्केविद्विशेषणिकसिद्धत्वज्ञानेनैवेत्यर्थः सामान्येच्छाविच्छेदकेति व्यक्तं तद्व्यपि सामान्यध
र्मेऽदृश्यतावच्छेदकत्वेच्छानुत्पादइत्यर्थः ननु सामान्येच्छोत्पत्तिः सामान्यधर्मावच्छिन्नासु यावतीषु व्यक्तिषु तत्तद्व्यक्तित्वेन सिद्धत्वज्ञान
मेव विरोधि न तु सामान्यधर्मप्रकारेणाऽयत् किंचिद्व्यक्तिमात्रे सिद्धत्वज्ञानमित्यत आह अन्यथेति मातिप्रसिद्धरूपेणासर्वासु व्यक्तिषु सिद्ध
त्वज्ञानस्यैव विरोधित्वेऽर्थः एकत्वविषयसिद्धेरिति। तादृशपत्तावच्छेदकरूपाकृत्वादिसामान्यधर्मावच्छिन्नासु यावतीषु व्यक्तिषु मति
षिकरूपेण सिद्धत्वज्ञानस्येत्यर्थः तद्विच्छेदोऽनस्यादेवेति सिद्धत्वज्ञानप्रयुक्तपाकत्वादिसामान्यधर्मादृश्यतावच्छेदकत्वेच्छाविच्छेदः
क्वापि न स्यादित्यर्थः। केचित्तु ननु सामान्येच्छायां सामान्यधर्मप्रकारेण सामान्यधर्मावच्छिन्नासु यावतीषु व्यक्तिषु सिद्धत्वज्ञानमेव
विरोधीत्यत आह अन्यथेति यावतीषु व्यक्तिषु सामान्यधर्मप्रकारकसिद्धत्वज्ञानस्यैव विरोधित्वेऽर्थः एकत्वत्वविषयसिद्धेरसंभवेने
तिस्वविषयतावच्छेदकपाकत्वादिसामान्यधर्मावच्छिन्नासु यावतीषु व्यक्तिषु सिद्धत्वस्याबाधितत्वेनेत्यर्थः तद्विच्छेदस्तु तिअन्यथाव्याख्या
यमासर्वत्रासिद्धत्वज्ञानस्यासंभवादिति भावइत्याहुः ननु कार्यज्ञानाभावापन्नानां ज्ञानेच्छाकृतीनां एकविशेष्यकत्वानुभवात् सिद्ध
त्याच लाघवात्त्वकृतीच्छास्तेनैककारकतानेन वा तिप्रसंगः गमकाभावात् तद्विशेष्यककृतौ तदनुकूलत्वकृतीच्छाया एव हेतुता यावकृत्यता
त्पाकानुकूलत्वकृतीच्छात्वव्यक्तिसाध्यप्रकारकपानेच्छात्वयोः हमशरीरत्वान्नलाघवमोरवमिति वाच्यं तावताऽपि विनिगमनाविरह
पात्तनेनहेतुतायां गौरवात् तनचपाकानुकूलकृतेच्छायाहेतुत्वे स्यापवयेदिच्छाद्वारा पचनिं प्रति पाकानुकूलकृतीष्टसाधनताज्ञानस्य हेतु

त्वप्रसक्तौ प्रवृत्तिं प्रतीष्टसाधनताज्ञानस्य कार्यैककारणभावे कारणतावच्छेदकगौरवं पाकेष्टसाधनताज्ञानत्वापेक्षया पाकानुकूलकृतीष्टसा
धनताज्ञानत्वस्य गुरुत्वादिति वाच्यं। प्रवृत्तिं प्रति इष्टसाधनताज्ञानस्य हेतुत्वेपि क्षतिविरहात् इच्छायै नो पक्षीशाव्यातत्कृतौ इच्छां प्रति च कृ
तीष्टसाधनताज्ञानस्य हेतुतया पाकत्वावच्छिन्नतत्त्वात्तत्र पाकेष्टसाधनताज्ञानत्वस्यावच्छेदकस्य लघुत्वे प्रवृत्तिं प्रति स्वकृतिसाध्यत्वप्रकार
कज्ञानस्यापि पृथक्कारणत्वकल्पनेन गौरवाच्छेनच तन्नापि स्वकृतिविशेष्यकपाकानुकूलत्वप्रकारकज्ञानस्य हेतुत्वान्तत्तुल्यत्वमिति वा
च्यं तस्य पृथग्हेतुत्वविरहात्। पाकानुकूलकृतित्वप्रकारेणाताद्दृशकृतिविशेष्यकेष्टसाधनताज्ञानत्वेन हेतुत्वादिष्टसाधनताज्ञानस्य हे
तुतायामेवतस्य प्रवेशात्। पदिचत्तत्वापि स्वकृतिसाध्यपाककृत्प्रकारकेष्टसाधनताज्ञानत्वेन हेतुत्वं न तु स्वकृतिसाध्यत्वज्ञानस्य पृथ
ग्हेतुत्वं तदा तु नावच्छेदकलाघवं समानावंपि स्वकृतिसाध्यपाकेष्टसाधनताज्ञानत्वपाकानुकूलस्वकृतिसाध्येष्टसाधनताज्ञानत्वयोः
समशरीरत्वादित्यस्वरसाद्दाह वस्तुतस्त्विति इष्टोपायत्वं च भातमिति नन्वेवमनेनेष्टोपायत्वभानाभिधानमनुपयुक्तं मिष्टसाधनत्वज्ञान
स्य कृतिसाध्यत्वप्रकारके च्छोपायहेतुत्वादिति वाच्यं स्यात् धनत्वेनतुल्यसाम्यग्रीकत्वं पाकदृनापत्तदभिधानात् स्वसमानप्यिष्टसाधनताज्ञा
नस्यापि हेतुत्वेपि वक्ष्यमाणयुक्त्या इष्टसाधनताज्ञानविशिष्टकृतिसाध्यताज्ञानहेतुतया इष्टसाधनताज्ञानस्य कारणतावच्छेदके तेनापेक्षि
तत्वाच्छ्रातिथ्यपंक्त्वोभाव्यत्वादाह क्रियापादाद्वा स्वेति इष्टसंपत्तिकृतेः साक्षात्साधनत्वस्य बाधात्तज्जन्यक्रियायामिष्टोपायत्वमस्य हेतोवास्पद
शेदृत्वादितिभावः तद्बोधात् इष्टसाधनताबोधात् चिकीर्षातो न स्वकृतिसाध्यत्वप्रकारकेच्छातो न कृतौ इच्छातो न कृतौ इच्छातो न पाकानुकूलकृतौ

चि·मथु·

च्छात्वेनाभिन्नविषयतयो गौरवादिति भिन्नविशेष्यकत्वे लक्षणे गौरवादित्यर्थः। न च समानविशेष्यकत्वभिन्नविशेष्यकत्वलक्षणलाघवगौ
रवं न कारणतायामपि विनिगमकं किंतु अवच्छेदकलाघवगौरवं कल्पनालाघवगौरवं च तत्पेतिवाच्यं। एकत्रावच्छेदकलाघवादेरसत्त्वेऽपि गु
रुपि विशेषोऽध्यवसायस्तु रूपतिन्यायेन समानविशेष्यकत्वभिन्नविशेष्यकत्वलक्षणलाघवगौरवस्यापि कारणतायां विनिगमकत्वात्। लाघवगौ
रवस्य कारणताविनिगमकत्वे तन्निष्कारणान्यवहारस्यैवानियामकत्वात्तस्यान्यथाऽनुमितिमति वह्निव्याप्यो धूमः पर्वते इत्यादिपक्षविशेषणा
कपरामर्शस्य हेतुतायां पूर्वोक्तसंसर्गेणानुघटादिविशिष्टतानं प्रति भूतले घटाभाव इत्यादिभावविशेष्यकज्ञानस्यापि प्रतिबंधकत्वापत्तेः अ
वच्छेदकत्वादिलाघवगौरवविरहादिति भावः। किंतु भिन्नविषयतया गौरवादिति भिन्नविशेष्यकतया कार्यतावच्छेदककारणतावच्छेद
कगौरवादित्यर्थः। कृतिसाध्यत्वविषयकेच्छाया हेतुत्वे साध्यतासंसर्गेण स्वकृतिप्रकारकेच्छात्वेन हेतुत्वं स्वकृतित्वेन च कार्यत्वं तद्धर्मा
वच्छिन्नप्रकारतापरत्वासत्त्वेऽपि तुल्यत्वादिति दिक्। ननु एवं तु कृतिसाध्यत्वप्रकारकेच्छा चिकीर्षा तथापि तत्र कृतिसाध्यताज्ञानं न हेतुः किं
त्विष्टसाधनताज्ञानमेव न चैवं कृतिसाध्यताज्ञानेऽपि चिकीर्षापत्तिरिति वाच्यं तत्प्रकारकेच्छां प्रति तद्धर्मावच्छेदेनेष्टसाधनताज्ञान
स्य हेतुत्वे न कृतिसाध्यताज्ञानदशायां कृतिसाध्यत्वावच्छेदेन पाकस्येष्टसाधनताज्ञानाभावादेव तत्र चिकीर्षानुत्पत्तेरित्याशंकते तत्त
थापीतियेन रूपेणेति यद्धर्मावच्छेदेनेत्यर्थः। इष्टसाधनत्वं इष्टसाधनत्वग्रहः तेन प्रकारेण तत्प्रकारेण वस्तुके दारदृष्टिता
वच्छेदेनेत्यर्थः। इष्टसाधनतानवगाहिना तदिष्टसाधनं तदिष्टसाधनत्वग्रहः ततस्तस्मात् इति शेषः। नंतरं न कृतिसाध्यताज्ञाने चिकीर्षेत्तीति शेषः कृतिवि

वयेवेतिवाच्यस्वार्थेकृताविशेषणंतत्संयोगः तथाचकृताविवकृतिविषयेष्टसाध्ये: इष्टीच्छेतिचिकीर्षाविषयतत्संयोगाद्युद्देश्यकासिद्धदृष्टिगोचरेच्छेस
र्थः तत्रजलसंयोगादिसाधनताज्ञानस्यापिप्रेरकतापिहेतुत्वोपगमादितिभावः गौरवात्कृतिसाध्यपाकत्वस्यकारणतावच्छेदकत्वेगौरवा
त्तत्वं पाकः परंपरया। कृतिविनाशेनेत्यर्थः। वह्निनाशाधायकावीतिवारितेत्यपाकविशेषसाध्यत्वप्रकारकेतिविशेषः इष्टसाधनताज्ञानात्स्वे
तिनतुतदवच्छेदेनेष्टसाधनताज्ञानादित्यर्थः कारणमात्वनुपकारितिव्यन्यथाकृतिसाध्यताज्ञानेऽपिचिकीर्षोत्पत्तेरित्युक्तत्वादितिभावः न
नुप्राणापंचकसंचारादौजीवनयोनिकृतिसाध्यताज्ञानेऽपिचिकीर्षाप्रवृत्त्यापत्तिरित्यतआहकृतौचेतिविशेषः विशेषणं तथाचचिकीर्षा
धीनकृतिसाध्यताज्ञानेहेतुः जीवनयोनिकृतिसाध्यत्वं नतथेतिभावः जीवनयोनीतिजीवनयोनिप्रयत्नत्वेन कृतित्वेनवाजीवनयोनिकृति
साध्यताज्ञानेत्यर्थः इदमुपलक्षणंनिवृत्तित्वेनकृतित्वेनवानिवृत्तिसाध्यताज्ञानमेवेत्यपिबोध्यंनत्वप्राणसंचारेपिप्रवृत्त्यापत्तिर्यतेतस्या
प्राणसंचारादानेमविष्यतीत्युपादानप्रत्यक्षाभावादेवनप्रवृत्तिरितिवाच्यं। प्राणवहनाड्याःपितदुपादानत्वसंभवात्तस्याभिघातहे
रप्राणसंचारजनकत्वात्तत्प्रत्यक्षस्यापिप्रत्यक्षत्वाभ्युपगमाच्च किंत्वातिरिक्तस्थलेइष्टसाधनतालिंगककृतिसाध्यताज्ञानस्यवि
शेषसामग्रीत्वेनाग्रेवाच्यत्वात्तदभावादेवनतत्रचिकीर्षाप्रवृत्तिरितिवाच्यंतत्रापीष्टसाधनत्वेनतदनुमेनवात्तल्लिंगककृत्यर्थताज्ञा
नस्यापिसंभवात्तन्वेष्टापत्तिः जीवनयोनिकृत्यादिसाध्यताज्ञानदशायांचिकीर्षोत्पत्तेः सर्वानुभवसिद्धत्वादितिभावः॥ अत्रमिश्राः
प्राणपंचकसंचारस्यापिचिकीर्षाप्रवृत्तिविषयत्वस्वरूपयोग्यत्वात्प्राणपंचकसंचारत्वरूपविशेष्यतावच्छेदकांशभावेनाचिकीर्षाप्रवृत्तिकृतिसाध्य

वि॰म॰श॰ ताज्ञानानां कार्यकारणभावस्य क्वचिद् एककस्मात् कृतिसाध्यताज्ञानस्य विषयनिष्ठतया हेतुत्वपक्षेऽपि स्वरूपायोग्यविशेष्यव्यावृत्तविशेष्यताया
एवकारणतावच्छेदकप्रत्यासत्तिताज्जीवनयोनिकृत्यादिसाध्यताज्ञानेऽपि प्राणपंचकसंचारे प्रवृत्तिरिति चिकीर्षाधीनत्वं विशेषणं नोपा
देयमेव अन्यथा चिकीर्षाधीनत्वविशेषणोपादानेऽपि तदधीनकृतिसाध्यत्वस्यैव भ्रमात् प्रवृत्त्यापत्तेर्दुर्वारत्वादित्याहुः तदसत् कृतौ चिकीर्षा
धीनत्वाविशेषणे एवं रूपेण प्राणपंचकसंचारे प्रवृत्त्यभावोपपादनेऽपि घटादौ कृतित्वेन जीवनयोनिकृत्यादेः साध्यताभ्रमात् प्रवृत्त्यापत्ते
र्दुर्वारत्वात् घटत्वादिना कार्यकारणभावस्यावश्यकत्वात् तन्निष्ठविशेष्यतायाः स्वरूपायोग्यव्यावृत्तत्वाच्च न दोषापत्तिरनुभव
विरोधात् अन्यथा प्राणपंचकसंचारेऽपि प्रवृत्तिर्भवतात् न हि तस्य स्वरूपायोग्यत्वेऽनुभवातिरिक्तं प्रमाणमस्ति आहारार्थप्रवृत्तिश्वास
प्रश्वासदशायां प्राणसंचारेऽपि चिकीर्षाप्रवृत्त्योरनुभूयमाना तथा प्राणसंचारस्य स्वरूपायोग्यत्वविरहाच्च न चैवं चिकीर्षाधीनत्वविशे
षणोपादाने तदधीनकृतिसाध्यत्वस्यैव भ्रमात् प्राणसंचारे प्रवृत्त्यापत्तिर्दुर्वारेति वाच्यं तत्र ज्ञानाप्रवृत्त्यापत्तेरेककारणत्वात् जीवनयोनिकृ
तिसाध्यताज्ञानदशायामिष्टापत्तेः सर्वानुभवविरुद्धत्वेनाशक्यत्वात् अन्यथैतादृशानुभवविवादे कार्यकारणभावव्यवस्थैव न स्यात्
। न च कृतित्वेन कृतिसामान्यसाध्यताज्ञानत्वेनैव हेतुत्वं जीवनयोनिकृत्यादिसाध्यताव्यावृत्तप्रकारतानिरूपितविशेष्यतायाः कारणतावच्छे
दकप्रत्यासत्तिताच्च नोक्तातिप्रसंग इति वाच्यं तथा सति लाघवात् ज्ञानत्वेनैव हेतुतौचित्ये न कृतिसाध्यत्वविषयकत्वांतर्भावस्यापि व्यर्थ ८०
त्वापत्तेः जीवनयोनिकृतित्वावच्छिन्नजीवनयोनिकृत्यादिसाध्यताव्यावृत्तकृतिसाध्यतानिष्ठप्रकारतानिरूपितविशेष्यतायाः प्रत्या

सति त्वाभ्युपगमे नैवातिप्रसंगो गर्भगतं भवात्मरुजितिसाध्यताप्रमाणसंचारे महसुसाद्यनवाप्तिदुर्वारत्वात् कृतिसाध्यतानिष्टप्रकारतानिरूपि
तविशेष्यतायाः प्रत्यासत्तित्वाभावेच कृतिसाध्यताविषयकत्वांतर्भाव इति चेन्न हि प्रवृत्तितावच्छिन्नप्रवृत्तिसाध्यतानिष्टप्रकारतानिरू
पितविशेष्यतायाः प्रत्यासत्तित्वाभावे चिकीर्षाधीनत्वोपादानस्यापि वैयर्थ्यकत्वादिति कृतं पल्लवितेनेति कृतिसाध्यत्वेन कृतिसाध्यत्व
सतीष्टसाधनताज्ञानस्य हेतुतापक्षेऽपि मर्थः ननु तत्तद्गत्याद्या चिकीर्षाधीनत्वाकृतिसत्वे साध्यताज्ञानं हेतुः चिकीर्षाधीनकृतित्वेन तत्तत्सा
ध्यताज्ञानं वेति विकल्प्य दूषयति नान्विति अपरत्वस्य चात्वेपरिचायकमात्रत्वेन ज्ञानाविषयतया कारणतावच्छेदककोटिप्रविष्टत्व इति या
वत् उपलक्ष्यमात्रगतेति चिकीर्षाधीनपदप्रतिपाद्यमात्रनिष्ठत्वस्यार्थः मात्रशब्दो यावदर्थकः अतः प्रमेयत्वादिवारणाय अनती तिकृतिमा
त्रस्य कृतित्वस्य अतिप्रसंगात् जीवनयोनिपत्नसाधारण्यात् तत्तत्कृतिविशेषाः तत्तत्कृतित्वेन तत्तत्कृतिविशेषा उपलक्ष्याः का
रणतावच्छेदकप्रविष्टतया चिकीर्षाधीनपदप्रतिपाद्याः अन्यथा प्रमेयत्वादिप्रकारकज्ञानमादायातिप्रसंगादिति भावः तदननुग
मात् तत्तत्कृतित्वानां नानात्वात् प्रवृत्तेरननुगमः प्रवृत्तिसामान्ये व्यभिचारः विशेषणत्वेन ज्ञानाविषयतया कारणतावच्छेदककोटिप्र
विष्टत्वाभावा निर्विकल्पकगौरवं न दोषायेत्यत आह प्रमाणाभावाच्चेति ननु यथोक्तातिप्रसंगवारणान्यथानुपपत्तिरेव मानमिति चेदेवं
तस्माह किंचेति सांख्यावस्थापाः साध्यत्वविशिष्टाः सिद्धावस्थसाधनत्वेति सिद्धतादशामात्रहतियाकादिनिष्ठसाध्यतानिरू
पकत्वे समर्थः साधनत्ववत् साध्यतानिरूपकत्वेनापि साध्यताश्रयत्वस्य विरोधादिति भावः कृतिसाध्यता चिकीर्षासाध्यकृतिसाध्य

त्वात्उपलक्ष्यमात्रगतानामतिप्रसक्तधर्मोनास्तीतियदुक्तंतत्रद्रव्यत्वस्याऽस्तिहीतिकृतिविशेषः कृतिनिष्ठविशेषः चिकीर्षोपलक्ष्यः चिकी
र्षाधीनपदप्रतिपाद्यः पत्रेतिपदवाच्येत्यर्थः जातिरूपइति महोतिवाच्यजातिरूपइत्यर्थः नचैकस्मिन्नसमूहालंबनयत्नेऽनिष्टार्थेनिष्ठ
त्रिरूपेष्टसाधनत्वप्रवृत्तिरूपेनिवृत्तिनमोदायत्वांकल्प्येमितिवाच्यंरागद्वेषयोर्यौगपद्याभावादेकस्यप्रवृत्तिनिवृत्तिरूपतासंभवात्तत्र
तत्रापेक्षाबुद्ध्यात्मकेष्टानिष्टसाधनतादिविषयकसमूहालंबनमेकंज्ञानंततःक्रमेणफलेच्छाफलद्वेषौततःक्रमेणउपायेच्छाउ
पायद्वेषौततस्तदुभयाविषयकप्रवृत्तिनिवृत्त्यात्मकसमूहालंबनयत्नसंभवइतिवाच्यं अपेक्षाबुद्धेःक्षणत्रयावस्थायित्वा
त्वात्उपायेच्छाकालेतत्राशादुपायद्वेषासत्त्वसंभवेनतत्राप्युभयात्मकयत्नासंभवात्उपादानप्रत्यक्षस्यप्रवृत्तिंप्रतिसाक्षात्साध
नस्यविषयत्वेनापितत्रोभयात्मकयत्नासंभवाच्चज्ञानेच्छादिवानांयौगपद्याभावेनतत्राव्यवहितपूर्वमुपादानप्रत्यक्षासंभवात्तन्नत्र
यापिज्ञानेच्छयोर्ज्ञानद्वेषयोरागद्वेषयोर्वायौगपद्याभ्युपगमेनाकल्प्येद्वाभ्यामितिवाच्यंतथासतितत्रैवयुगपत्प्रयत्नद्वयाभ्युपगमेनसौ
कर्यक्षितिहात्प्रयत्नयोर्यौगपद्यस्यापिएकदासमवेत्रपरस्परविलक्षणविषयसंयुक्तचेष्टाप्रयोजकरूपत्वात्प्रयत्नभेदंविनातदनुपपत्तेरिति
भावः अनुगताकारेणेतिप्रवृत्तित्वनिवृत्तित्वाद्यनुगतधर्मप्रकारेणेत्यर्थः उपाधिरूपइतिअखण्डोपाधिरूपइत्यर्थः गुणत्वाज्जा
त्यनभ्युपगमादितिभावः। चिकीर्षाजन्यत्वेनेति। चिकीर्षाजन्यतावच्छेदकेनैवेत्यर्थः अनुगतेनसर्वसाधारणेनउपलक्ष्यमाणानांचिकी १५०
र्षाधीनपदप्रतिपाद्यानांअनुगतत्वंसर्वसाधारणेनातिप्रसक्तधर्मावच्छिन्नत्वंप्रत्येकमित्यमतद्द्वेषोतःतत्स्यनश्ज्ञानविषयेनउपलक्षितांप

मिता॥ धेनुपदेनोऽर्थं तत इति॥ धेनुपदजन्यबोधविषयादित्यर्थः॥ ननु गोतमपीनित तज्जन्यबोधविषय इति शेषः॥ शक्यतावच्छेदकत्वं तु प्रधानकर्म
त्वमेव गोत्वस्य प्रयोगोपाधित्वाच्च तस्य महिष्यादिसाधारण्येपि न महिष्यादिबोध इति भावः॥ तथा चिकीर्षापीति एवं चिकीर्षाजन्यत्व
मपीत्यर्थः॥ न कारणीभूतज्ञानविषय इति शेषः॥ किंतु चिकीर्षाधीनत्वेन प्रमितानां व्यक्तिविशेष एव कारणीभूतज्ञानविषय इति भावः॥ क
चिदेवं चिकीर्षापीति पाठः॥ कृतित्वेन कृतिविशेषत्वेन वाननुगम इति न व्यभिचार इत्यर्थः॥ तथा च प्रवृत्तिस्वरूपयोग्यप्रवृत्तिसाध्यताज्ञानं
प्रवृत्तौ हेतुरिति भावः॥ कृतिसाध्य इति कृतिसाध्यताज्ञानं प्रवर्त्तकमित्यत्र कृतिसाध्यताज्ञानेत्यर्थः॥ न विशेषणादिति न तद्रूपेनापि प्र
वृत्तिकारणत्वेनान्वितेत्यर्थः॥ अप्रमत्वादिति कृतेः प्रवृत्तिपर्वमसत्त्वादित्यर्थः॥ स्वरूपेणापि प्रवृत्तिहेतुत्वाभ्युपगमे वा कृतेः सर्वां कृतावुत्पन्ना
यां ज्ञानं कृतिविशिष्टज्ञानं प्रवर्त्तकमिति शेषः॥ ज्ञाने कृतिविशिष्टज्ञानेनोपलक्षणं मितिज्ञानं तज्ज्ञानानपि नाप्रवृत्तिकारणत्वेनाभिमतमि
तेत्यर्थः॥ अतिप्रसंगादिति ज्ञानमात्रात् कृत्यसाध्यत्वेनानिश्चितेपि प्रवृत्तिप्रसंगादित्यर्थः॥ कृतौ यथोक्तोपलक्षणत्वसत्त्वेपि कृतिवि
शेषत्वेन कृतिविशेषविषयकसाध्यताज्ञानस्यैव हेतुत्वात् ज्ञानमात्रस्यावृत्तेरिति समाधत्ते कृतीति॥ ज्ञानस्य कारणीभूतज्ञाने विषय
त्वापत्तिविषयतार्थं दत्वेन विशेषणमेव तद्विषयकज्ञानाद्यावर्त्तकमेव साध्यत्वेति किंतु प्रवृत्तिस्वरूपयोग्यैवेत्यर्थः॥ परिचायक तथाचाव
विषयतयाकारणतावच्छेदकत्वाकारणताभावे नेति शेषः॥ उपलक्षणमिति ज्ञानान्वापि नाप्रवृत्तिकारणत्वेनान्वितमित्यर्थः॥ वि
शेषणत्वोपलक्षणत्वयोर्विरोधेपि व्यावर्त्तकत्वोपलक्षणत्वयोर्विरोधाभावादिति भावः॥ इष्टसाधनतेष्टसाधनताज्ञानोलिंगज्ञानाद्वाविति

चि·म·श· तत्रापि लिंगं न विशेषणं अतीतानागतलिंगस्थलेऽनुमितिपूर्वं तदसत्वात् नोपलक्षणं ज्ञानमात्रादनुमितिप्रसंगादिति भावः न चैवमिति पूर्वं एवमपि
प्रवृत्तित्वेन प्रवृत्तिसाध्यताज्ञानस्य हेतुत्वेपीति यावत् श्रमेपीति श्रमो नांतरीयकदुःखं विशेषः चिकीर्षा स्यादिति श्रमत्वरूपेण चिकीर्षा स्यादित्यर्थः
अन्यथा सुखत्वादिरूपेणात्रापि चिकीर्षापत्तेः तेन रूपेण प्रवृत्तिः स्यादित्यपि बोध्यं चिकीर्षाधीनकृतिसाध्यत्वादिति वस्तुतः नक
क्रियाहेतुप्रवृत्तिसाध्यत्वादित्यर्थः ननु श्रमे चैत्यवंदनादिवदिष्टसाधनताज्ञानाभावादेव न चिकीर्षाप्रवृत्तिः तैरपि निर्वाहादतिरिक्तस्येत
इष्टसाधनतालिंगककृतिसाध्यताज्ञानस्यैव चिकीर्षाप्रवृत्तिविशेषहानिप्रतीतेन वक्ष्यमाणत्वात् । न च भक्ष्यादीनां सुखैकश्रमैर्गमनाशा
दिरूपेष्टसाधनताज्ञानमपि वर्त्तते इति वाच्यं तत्रापि श्रमहेतुक्रियाया एव रोगनाशादिसाधनत्वेन श्रमस्येष्टसाधनत्वाभावादिति चेन्न इ
ष्टसाधनत्वश्रमे रागाल्लिंगककृतिसाध्यताज्ञानसंभवात् भ्रमस्तु ज्ञानद्वयमेकं वा तेन समेदेतत्पक्षश्रमात्मकदुःखध्वंसेच्छोद्दृष्टा तत्र इ
ष्टसाधनताप्रमापाऽपि संभवात् न च तत्र तदानीं चिकीर्षाप्रवृत्त्यारिष्टापत्तिरिति वाच्यं दुःखत्वादिरूपेणादुःखस्येच्छाप्रवृत्तिविषयत्वेमा
नाभावेनानुरञ्जनेनेच्छाद्यात्कुलमित्युक्तेः स्वस्यापीच्छाप्रवृत्तिविषयत्वरूपायोग्यमिति सिद्धान्तात् नैवं भक्ष्यादीनां व्यापाराभावादिति श्रमे
चिकीर्षाप्रवृत्त्यनुपपत्तिरिति वाच्यं तत्रापि तद्धेतुक्रियायामेव चिकीर्षाप्रवृत्त्युत्पत्तेर्न तु श्रम इति भावः ‹ अप्रयोजकत्वशंकायामाह यदस्येति
कृतेरिति स्वध्वंसेति स्वध्वंसप्रागभावसाक्षात्कारातिरिक्तं यत्स्वजनकचिकीर्षाविषयत्वं स्वजनकत्वनियमादित्यर्थः ‹ अत्र स्वध्वंसः स्वज दृष्ट०
न्याधोध्वंसेन विरोधिगुणात्पागुण्यात्स्वनाशकत्वेपि न क्षतिः ध्वंसप्रागभावसाक्षात्कारातिरिक्तेति तु न्यायः ध्वंसपक्षस्य निजापायस्य पराश्रितत्वान्मते ‹

तिष्क्रियस्यत स्यानभ्युपगमात् चिकीर्षितजनकत्वापाताभ्येत्स्यापि विशेषणात् श्येने चापाद्याभिचारः श्येनस्येव कारणात् पाटवज्ञानस्य शत्रुवधोद्देश्या श्येनस्य
नेकत्वज्ञानस्यावातपागाकाशाधारे वतज्ज्ञानकत्वादिति भावः । निगडनेश्च लोदेहस्येति च तन्नेश्च मातमहज्ञानेपेतिविशेषः न तु तत्त्वापि नागीति
पत एव श्रमद्वेष्यमहत्वे गृहस्तु सेव इतिनि मित्र एव मौ दुःखमासापेस्यर्थः अभिचारात्स्वर्गद्वेष्यादिनिषमस्य अभिचारात्अभिचारमेव विद्व
णोतिन हीति चेत्पा द्वित तस्माधानमाशंक्य निराकरोति चिकीर्षेति चिकीर्षाजन्य कृतितेन चिकीर्षाजन्यकृतिसाध्यत्वमित्यर्थः प्रकृतेत
श्येनविचारितत्वादिति भावः द्वेषपोनि यत्नादिति शत्रुगोचरद्वेषजन्यशत्रुवधगोचरप्रवृत्तितोपीत्यर्थः । इष्टसाधनत्वेनेति चिकीर्षाविष
यत्वेपीति शेषः फलाजनकत्वादिति पदस्य जनकतादिस्यर्थः । भिन्नविषयत्वात् । प्रवृत्तिं प्रति चिकीर्षापाञ्चभिचारपरत्वगान्नेति भावः नेष्टु
वनिष्टनिरपि न द्वेषजन्यास्यात् अनिष्टसाधनताज्ञानस्य तत्त्वापिस्तत्तथा शत्रुवधमहतिध्वंसे शत्रोर्द्वेषे किंस्यान्न मित्यतआह द्वे
षमिद्धिहस्तितिनिवानी मितिशेषः । न च द्वेषस्य प्रवृत्तजनकत्वेपि निवृत्तिजनकत्वमस्त्वेवेति तज्जन्य श्येनेष्वभिचारात्तस्य मस्यनेतन
रूपेणाकृतिसाध्यत्वमिति वाच्यं निवृत्तेर्भिन्नविषयतया क्रियाप्रत्यजनकत्वेनश्रमाजनकत्वात् पलायनादिक्रियापास्वतद्वर्वर्जन
रूपेष्टसाधनताज्ञानाधीनस्य प्रवृत्तिजन्यत्वादिति भावः यदितितथाच चिकीर्षाविषयत्वसंभवतादृशा कृतिजन्यतावच्छेदकमिति भावः नन्वेवं
भोजनादावपि चिकीर्षा न स्यात् । तस्यापि श्रमवत्कृतिमात्रजन्यतादिस्यतआह भोजनादाविष्टेति जीवनयोनियत्नसाधारणाकृतिते
नश्रमं प्रतिजनकत्वमुक्तं जीवनयोनियत्नेननदाहयद्वेतितद्भमजनकत्वंतस्याश्रमजनकत्वम् । कसंजरात जीवनयोनियत्नाजन्यजीवन

चि·म·२ यो नियतत्वस्य श्रमविशेषाणां भोजनादिनांतरीयकश्रमाणां भोजनादिकृतिसाध्यत्वमिति नतु जीवनयोनिकृतिसाध्यत्वमिति भावः। तज्जन्यकृति
जीवनयोनियत्नजन्यत्वस्यार्थः तथाच श्रमसामान्यस्यैव तज्जनकृतमकृत्वा नृमानादिसाभिमानेन श्रमात्येति। शरीरस्य पांचभौतिकत्वात्त्रि
द्वायाम्याहतगतिना वायुनाश्रानीतवहिस्वरजोभागेन शरीरस्यावृद्धिः प्रश्वासस्तेनतेन पुनःपूरितं तत्वं रोमादिसंधिना निर्गच्छतीति
ड्डानादितिभावः तदनुवृत्ताविति जीवनयोनियत्नानुवृत्तावित्यर्थः एतत्सर्वंसमाधिसौकर्यादुक्तं वस्तुतस्तु श्रमस्य चिकीर्षाधीनकृति
त्वेन तादृशकृतिसाध्यताभावेपि तद्व्यापारत्वचिकीर्षाप्रयुक्तत्वापत्तेर्दुर्वारत्वात् तत्क्लेशापत्तिः स्वरूपायोग्यत्वभंगप्रसंगादित्यपि वाध्यं विद्या
धीनत्वस्येति स्वप्रकारकेच्छाधीनत्वस्येत्यर्थः स्वपदं चिकीर्षाप्रवृत्तिप्रकारीभूतधर्मपरं कृतिविशेषणत्वाशिति चिकीर्षाधीनपदोपल
क्षितप्रवृत्तितावच्छेदकविशेषणत्वादित्यर्थः तथाच स्वप्रकारकचिकीर्षाप्रयुक्तत्वं च प्रति स्वप्रकारकेच्छाधीनप्रवृत्तिसाध्यताज्ञानत्वेन
हेतुत्वमिति भावः अन्येच्छाया अन्यप्रकारकेच्छा एवमप्यपि तु स्वत्वेन तु स्वतःप्रकारकानाश्रयाधीनत्वमपाद्यतेन तु ज्ञायते तेन तु स्वत्वप्र
कारकेच्छायाः फलेच्छात्वेन प्रवृत्तावहेतुत्वेपि न मुख्यत्वरूपेणास्य चिकीर्षानुपपत्तिः न च स्वप्रकारकेच्छाधीनत्वस्य कृतिविशेषणत्वा
त्वापि तादृशकृतिसाध्यत्वस्यैव श्रमात्वश्रमत्वरूपेणाश्रमे चिकीर्षाप्रवृत्त्यापत्तिर्दुर्वारा इष्टापत्तौ च स्वरूपायोग्यत्वव्याघातात्तविशेषणा
वैयर्थ्यप्रसंगात्तत्पथाकस्यलेपि सापत्तेः संभवादिति वाच्यं। स्वप्रकारकेच्छाधीनत्वं हि न तं प्रयोजकं किंतु वस्तुगत्या या स्वप्रकारकेच्छा राम॰
धीना प्रवृत्तिः प्रवृत्तित्वेन तत्साध्यताज्ञानं हेतुरिति श्रमत्वप्रकारकेच्छाधीनप्रवृत्तेरप्रसिद्धतया तादृशश्रमासंभवात् अतएव साविषयकत्वमपहा

यत्स्वप्रकारकत्वयत्प्रेतानुधावनंश्रमेपि सुखसाधनताग्राहे स्वेच्छाधीनप्रवृत्तेः प्रसिद्धिरोलम्बेनाशेषसंभवात्। न च स्वप्रकारकेच्छाधीनत्वस्य स्वरूपस
तोविशेषणत्वे प्रवृत्तिर्यत्प्रेतानुधावनमप्युक्तं तावतैव जीवनयोनिकृत्यादिव्यावृत्तेः किंतु कृतित्वेन स्वप्रकारकेच्छाधीनकृतिसाध्यता
ज्ञानेनेन हेतुत्वमस्तु लाघवात् अभावेपि विनिगमनाविरहेण तादृशधियोपि हेतुत्वस्य दुर्वारत्वादिति वाच्यं। तेन रूपेण हेतुत्वे प्रवृत्ति
त्वेन प्रवृत्तिसाधनताव्यतिरिक्तनिश्चयदशायामपि कृतित्वेन कृतिसाध्यताज्ञानस्य संभवात् तस्मात् प्रवृत्त्यापत्तेः न च तथापि कृति
त्वेन कृतिसाध्यताव्यतिरेकनिश्चये प्रवृत्तित्वेन प्रवृत्तिसाधनताज्ञानात् प्रवृत्त्यापत्तिरिति वाच्यं सामान्याभावज्ञाने विशेषाभावज्ञान
स्योत्सर्गिकत्वया तदा तेन प्रवृत्तित्वेन प्रवृत्तिसाधनताज्ञानस्यैवानुपपत्तेः। यत्तु कदाचित्तत्तज्ज्ञानेपि नवज्ज्ञानेनतत्प्रवृत्ताविष्टाप
त्तेः प्रवृत्तिसाधनताज्ञानस्यैतत्प्रवृत्त्युपादरूपत्वेनुभवसिद्धत्वादिति भावः श्रमे चिकीर्षाधीनकृतिकारणत्वाभावादेव श्रमेनां
तरीयकत्वमिष्टलाभसमनंतरं च पर्यंतमिति तत्रैवेति। श्रमस्वप्रकारकेच्छाधीनकृतिसाध्यताविरहादेव न तु चिकीर्षाधीनकृतिसाध्यत्वावि
रहात् श्रमस्यमात्रनविचिकीर्षाधीनकृतिसाध्यत्वादित्यर्थः निष्प्रमतइतिशेषः अन्येच्छा अन्यप्रकारकेच्छा स्वचिकीर्षाधीनत्वात्ति
ति स्वप्रकारकचिकीर्षाधीनत्वमित्यर्थः। गौरवादिति चिकीर्षात्वस्य कृतिसाध्यस्वप्रकारकेच्छात्वाद्रूपत्वकारत्वगौरवाकृतिसाध्यत्वेन विशेषे
ण्यत्वादित्यर्थः। अत्र नव्याः स्वप्रकारकेच्छाधीनत्वस्य प्रवृत्तिविशेषणत्वेपि सुखदुःखाभावत्वरूपेणासुखदुःखाभावयोरतत्प्रकारेच्छाधीन
कृतिः साध्यत्वात्प्रवृत्त्यापत्तिर्दुर्वारा तत्राभिलाषादि [illegible] ष्टसाधनताज्ञानसंभवात् न चेष्टापत्तिः तयोश्चिकीर्षाविषयत्वेपि श्रमतेनश्रमव

चि.म.श्री.

तत्साध्यतया प्रवृत्तिविषयतत्स्वरूपायोग्यत्वमिति सिद्धांतात्तत्सिद्धांतानादरे ऽभेदस्वरूपायोग्यत्वसिद्धांतस्यानादरणीयत्वापातात् अथ विशेष्यता
वच्छेदकांतर्भावेन कार्यकारणभावस्य क्वचिदप्यकल्पनादेव न तत्र प्रवृत्तिप्रसंगः कृतिसाध्यताज्ञानचिकीर्षयोर्विषयनिष्ठतया हेतुत्वप
क्षेऽपि सुखत्वावच्छिन्नविशेष्यताया इष्टविशेष्यताघटितप्रत्यासत्त्यैव कृतिसाध्यताज्ञानचिकीर्षयोः प्रवृत्तिहेतुत्वान्न तत्र प्रवृत्तिप्रसं
गः। चिकीर्षा तत्र भवत्येवेति चेन्न हि स्वप्रकारकेच्छाधीनत्वमपि स्वरूपसद्विशेषणं अर्थे अभ्युपगम्यैवादृशात्मस्वरूपेणाचिकीर्षा
प्रवृत्तिप्रसंगवारणासंभवात् न च स्वप्रकारकेच्छाधीनकृतिसाध्यत्वाभावनिश्चयेन प्रवृत्तिरिति तत्तद्विशेषणाभावस्य कल्पमिति वाच्यं
स्वप्रकारकेच्छाधीनत्वस्य स्वरूपतस्तदविशेषणतया तादृशज्ञानसंभवेऽपि वस्तुगत्या तादृश्याः कृतेः कृतित्वेन तत्साध्यताधीसंभ
वात् तत्रापि तादृशीं प्रवृत्तेर्दुर्वारत्वात् अथेच्छोद्देश्यत्वं द्वेधा फलत्वेनोद्देश्यत्वं उपायत्वेनोद्देश्यत्वं च अन्यथेष्टसाधनताज्ञानेच्छायाः
कार्य्यकारणभावस्यैव दुर्वारत्वात् उक्तदोषस्फुटीभविष्यति तथा च स्वप्रकारकेच्छाधीनेत्यत्र स्वप्रकारत्वपरमुपायत्वेन यदुद्देश्यत्वं तद्व
च्छेदकतारूपप्रकारतापरं तेनामृतत्वसुखत्वदुःखाभावत्वानां तत्पर्याप्तेर्नामेव निरासः सुखदुःखाभावयोः साध्यतया प्रवृत्तिविषयत्वस्वरू
पायोग्यत्वेऽपि सुखदुःखाभावत्वाव्याप्योपायतापर्य्यवसानोद्देश्यत्वेनापीच्छाविषयत्वस्वरूपायोग्यतास्थितिचेत्तथापि स्वत्वस्यानुगतस्या
भावात्प्रातिस्विकरूपावगतत्वात्तद्घटितभावेनैव कार्य्यकारणभावानिर्वाहः तथा चात्मादिस्थले कार्य्यत्वालीकत्वयापास्तव पा एम
गयाकारिस्थले ऽनुमत्यापत्तिविषयसामग्रीबाधो ऽत्रात्मादौ प्रवृत्तिप्रसंगवारणासंभवादिति प्राहुः मीमांसकैकदेशिमतमाहुरन्ये त्विति

धर्मोन्तरमेवेति तद्द्विशिष्टकृतिसाध्यताज्ञानमेव प्रवर्त्तकतया गुरोरभिमतमिति भावः। तद्विशिष्टेति तदुद्देश्यत्वविशिष्टकृति तेन तदुद्देश्यत्वविशि-
ष्टकृतिसाध्यत्वं स्यार्थः यथा अकृतभोजनादिकृतेरेव श्रमजनकतया भोजनादिवत् श्रमस्याप्युद्देश्यतास्य कृतिजन्यतादर्शनेगतेः अवि-
कीर्षितत्वादिति चिकीर्षितं मतेश्चेतेन हत्स्वेणाकृतेः कारणत्वेन तत्स्य कार्यत्वात्तदहेत्वज्ञानान्नो न तादृशि भावः कृतिमात्रसाध्यत्वेति प्रवृत्ति-
त्वेन प्रवृत्तिमात्रसाध्यत्वेति साध्यतामतानादृशप्रयत्नात्स्मात्तु स्यात्प्रवृत्तिमात्रस्य श्रमजनकता तु भयोग्यत्वादित्यत आह अत एवेति प्र-
एवं प्रवृत्तित्वेन प्रवृत्तिमात्रसाध्यत्वे मतएव कर्मपहानिमानं कृष्टेश्रमजनकमिति नु भवेल्लोकानामित्यर्थः कारणतावच्छेदकस्य स्थ प्रवृत्ति-
त्वस्योद्देश्यत्वविशिष्टप्रयत्नसाधारणतया तेनापि श्रमोत्पत्तेरिति भावः। अत्रेदमवधेयं सर्वांशं तथा सति भोजनादावपि चिकीर्षा प्रवृत्तिर्न
स्यात्तत्रापि तत्त्याजनकत्वमानाभावात् तत्कर्मणोवोपपन्नत्वात् इष्टसाधनताभावश्चत्वाद्येनकारणतावच्छेदकतयातत्कल्पने सम्यगुपपाद-
कतया ज्ञानस्य तत्त्वकल्पनौचित्यात् एककारणापरिशेषापत्तिः किं च भ्रममेताद्दृश कृतिसाध्यताभावेपि तत्प्रमा चिकीर्षा प्रवृत्त्यापत्तिर्दुर्वारा
इष्टापत्तौ स्वरूपयोग्यत्वं आघातादिसनुबंधे यं रूढानी मीमांसकः स्वमते नैयायिकनयापेक्षया लाघवमुपपादयन् आयोजनद्वयेऽपि तिपद्यमिति
प्रयोजकं। ज्ञानविषयतया कारणतावच्छेदकं। तत्त्वतु नैयायिकस्य तु। कृतिसाध्यत्वेन हि तो इष्टसाधनत्वमिति कृतिसाध्यत्वं इष्टसाधनत्वं
चेत्यर्थः तेन न च तु ष्टयस्यानुपपत्तिः। सतिसुखेभोगस्यावश्यकत्वात्तत्स्य काम्यत्वमिति न भोगत्वमादायाधिक्यं। यदि च सोपीह्रा विषय-
तावतावपंचत्वं बोध्यं। इत्थं निष्ठानुबंधित्वज्ञानस्य कारणत्वे विवादात्तद्वोजं इच्छाप्रयोजकत्वं चेति कृतिसाध्यताप्रकारकेच्छाप्रयोज-

चि·म·प· कृतं चेत्यर्थः। इष्टमिति भोगस्येच्छाविषयत्वे भोगत्वमादाय तद्रूपं बोध्यं न· न्वेवं दृष्टिर्भवतीति कृतिसाध्यताप्रकारिका दृष्टाविच्छा न स्यादत आह दृष्टे
ति· दृष्टिसाध्यं सुखं भवतीत्याकारिका दृष्टिसाध्यताप्रकारिका सुखेच्छेत्यर्थः॥ दृष्टिमपीति किञ्चेषणां तथेति शेषः। इष्टसाधनत्वेन दृष्टसाधन
ताज्ञानेन तत्रेच्छेति दृष्टिर्भवतीत्याकारेण दृष्टाविच्छेत्यर्थः। साधनत्वस्येति साधनत्वस्याभिदृष्टसाधनत्वेन यावज्ज्ञानस्येच्छाविरोधिता
दित्यर्थः। तथा च दृष्टिर्भवतीत्याकारिकायादृच्छायाः पानुपत्वे पर्यवसानाच्चापलापः न च तथापि कृपालुहविग्रहपादानेच्छा कृपेत्यात्कृत्या अपि कृति
साध्यताप्रकारकत्वादिति वाच्यं। गुरुत्वपेतपादानेच्छायाः प्रवर्त्तकत्वानभ्युपगमेन तादृशेच्छायाश्चापि प्रसिद्धेः। ततश्चेपे चिकीर्षाविषय
साधनत्वेनोपादानप्रसक्षस्य लाक्षादेव प्रवर्त्तकत्वादिति भावः। त्वपमिति इष्टसाधनत्वमादाय भोगस्य काम्यत्वे भोगत्वमादाय तत्
द्रूपं बोध्यं। तद्रूपनिष्कर्षः· मीमांसकमते चिकीर्षात्वावच्छिन्नं प्रति कृतिसाध्यताज्ञानं हेतुः कृतिसाध्यताप्रकारकेच्छां प्रति च स्वत्वं·स्वा
भाववत्त्वज्ञानं स्वत्वंतुः स्वाभाववत्ताविरक्तरूपेण कृतिसाध्यताप्रकारिकेच्छायास्तत्त्वात्ताऽऽलीकृत्वादिति श्च प्रकारणाभावत्वरूपेणैवापि त्व
न्येषसामान्यतस्तत्र दृष्टीच्छात्वावच्छिन्नं प्रति तत्साधनताज्ञानत्वेन स्वत्वप्रकारकेच्छां प्रति स्वस्वप्रकारकज्ञानत्वेन तु स्वाभाववत्त्वप्र
कारकेच्छां प्रति तु स्वाभाववत्त्वप्रकारकज्ञानत्वेन चिकीर्षात्वावच्छिन्नं प्रति कृतिसाध्यताज्ञानत्वेन हेतुत्वमिति कार्यकारणभावचतुष्टय
मिति भावः। चिकीर्षात्वन्यकृतिसाध्यताज्ञानं प्रवर्त्तकं तत्र चिकीर्षाधीनत्वविशेषणप्रयोजनं तत्कं अन्यत्वतत्प्रयोजनं परं केचिद् दृति ६५०
तदुपन्यस्य दूषयन्ति। विषतीति इतीति· इत्यत्र चिकीर्षाप्रसंगवारणायेति शेषः। विशेषणमिति विषभक्षणे चिकीर्षाधीनकृतिसाध्यत्व

त्वमिमानः स्वाभिमानं निराकरोति एवं हीति विषभक्षणस्य सर्वथा चिकीर्षां प्रत्ययोग्यत्वे चिकीर्षाजनकज्ञानसाध्यत्वे हीनत्वेः जीवनयोनियत्नेरि
तिनि वृत्तेश्चेति शेषः । अर्थविशेषणाभिप्रायेणाह इति साध्यत्वाभावेनैव तत्रातिप्रसंगवारणसंभवात् भ्रमसाधारणातिप्रसंगस्य विशेषणाद्
नेष्टविशेषणादिति भावः नन्वेवं विषभक्षणादौ बलवदनिष्टाननुबंधीष्टसाधनताभ्रमदशायां चिकीर्षाप्रवृत्तिश्च भवतीति सर्वे
सम्मतेन तथा च प्रवृत्तिसाध्यताज्ञानमात्रस्य चिकीर्षाकारणत्वे तत्कालीनप्रवृत्तिसाध्यताज्ञानस्य सत्वात् संजात
बाधस्यापि प्रवृत्तिः स्यादिति नैयायिकस्याक्षिपति स्यादेतदिति इष्टसाधनताभ्रमादिति बलवदनिष्टाननुबंधीष्ट
साधनताभ्रमादित्यर्थः । उत्तरमिति शेषः तेनोभयमतसाधारण्यं भ्रमस्थापनये विशिष्टज्ञाने तन्मते वा
ष्टहीनतासंसर्गकज्ञानरूपमित्यम्मदेतत् । विषभक्षणादाविति विषभक्षणस्य बलवदनिष्टाननुबंधित्व
भ्रमात् इष्टसाधनताज्ञानेऽपि प्रवृत्तेः । इति साध्यत्वं चेत्सर्वं वृत्ते चेष्टसाधनताभ्रमादिति वोध्यं इतिसा
ध्यत्वमस्ति च कृतिसाध्यत्वमस्ति ज्ञानप्रयुक्तत्वात् इष्टसाधनताज्ञानप्रयुक्तत्वात् । कार्यत्वस्य कृतेः प्रयुक्त
त्वं च तत्वान्वये कारणतावच्छेदकविषयतासमान्वये च कारणविधयत्वमुपदेतत् कार्यत्वेति पाठे कृतिरूपकार्यस्येत्यर्थः

५६

चिन्तामणिशब्दखण्ड ५५०

Chintamani Sabda Khand

चिं॰म॰श॰ संजाततद्बोधद्वृत्तिरिष्टसाधनत्ववत्त्ववादिनश्चजनकत्वज्ञानदशायामपीत्यर्थः तत्रविषभक्षणा चैत्यवंदन
योः कार्यत्वज्ञानादिति निवृत्तफलेच्छाविरहादेव तत्र न प्रवृत्तिः स्वकृतिसाध्यतास्मरणादित्यर्थः इ
दमुपलक्षणं पाकादावपि संजाततद्बोधदशायां तथा प्रसंगो बोध्यः तत्रापीति न च फलेच्छाविरहादेव
तत्र न प्रवृत्तिरिति वाच्यं फलेच्छायानिसिव्यभिचारेणापि अविषयत्वेन चाजनकत्वादिति भावः । अ
त्रकस्यचित् समाधानं शंकते । स्वकृतीति ॥ तथा गुरुमते प्रवृत्तिहेतुः । अन्यथा कृतिसाधारण
ज्ञानमात्रस्य गुरुमते प्रवर्त्तकत्वे । इष्टसाधनतास्मरणादिति निर्द्दिष्टमितावच्छेदकत्वेष्टसाधनतास्मरण
इत्यर्थः । संजाततद्बोधइतिशेषः । प्रवर्त्तितचैत्यवंदनादौ प्रवर्त्तेत । अनुभवस्य हेतुत्वे च पक्षतावच्छेदक
प्रकारेणेष्टसाधनस्वरूपलिंगज्ञानाभावे कृतिसाध्यतानुभवाभावादेव न प्रवृत्तिरिति भावः केचित्तु यद्यपि संजातद्व
षस्येष्टसाधनतास्मरणमपि न संभवति तथापीष्टसाधनताज्ञानमात्रप्रवर्त्तकत्वेऽयं दोषः तदानीमिष्टसाधनत्वे
तियाधेपितदामनेष्टसाधनमास्तीतिस्मरणसंभवात् यदिचेदानीमिष्टसाधनताज्ञानं तस्येष्येतित्वपेतदाममापीदानींकृ

तिसमनतानातत्वेपि निरुक्तज्ञानस्य

718